1929.

THE

[C]HOWKHAMBĀ SANSKRIT SERIES,

A

[C]OLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 373

याज्ञवल्क्यस्मृतिः ।

श्रीमित्रमिश्रकृत'वीरमित्रोदय'टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा'टीकया च सहिता ।
साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च संशोधिता ।

YĀJÑAVALKYA SMṚTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's Mitākṣarā.

Edited By

Pt. Nārāyaṇa S'āstrī Khiste Sāhityāchārya, Assistant Librarian, and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya, Sādholāl Scholar,
Sarasvatī Bhavana, Benares.

FASCICULUS VII–७

PRINTED-PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press, North of Gopal Mandir, Benares.

1927

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—३७३

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency.
POONA.

इत्यत्र दत्त्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात्। पितृधनहारित्वं तु पूर्वस्य पूर्वस्याभावे सर्वेषामविशिष्टम्। (मनुः९।१८५)—'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः'। इत्यौरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषां रिक्थहारित्वप्रतिपादनपरत्वात्। औरसस्य तु (मनुः ९।१६३)—'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः'। इत्यनेनैव रिक्थभाक्त्वस्योक्तत्वात्। दायादशब्दस्य [१]'दायादानपि दापयेत्' इत्यादौ पुत्रव्यतिरिक्तरिक्थभाग्विषयत्वेन प्रसिद्धत्वाच्च। वासिष्ठादिषु वर्गद्वयेऽपि कस्यचिद्व्यत्ययेन पाठो गुणवदगुणवद्विषयो वेदितव्यः। गौतमीये तु पौत्रिकेयस्य दशमत्वेन पाठो विजातीयविषयः। तस्मात् स्थितमेतत्पूर्वपूर्वाभावे परः परोंऽशभागिति। यत्तु (९।१८२)—'भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्'॥ इति। तदपि भ्रातृपुत्रस्य पुत्रीकरणसम्भवेऽन्येषां पुत्रीकरणनिषेधार्थम्, न पुनः पुत्रत्वप्रतिपादनाय। 'तत्सुता गोत्रजा बन्धुः'—इत्यनेन विरोधात्॥ १३२॥

(मिता०) इदानीमुक्तोपसंहारव्याजेन तत्रैव नियममाह—

सजातीयेष्विति। समानजातीयेष्वेव पुत्रेषु अयं पूर्वाभावे परः पर इत्युक्तो विधिः न भिन्नजातीयेषु। तत्र च कानीनगूढोत्पन्नसहोढजपौनर्भवाणां सवर्णत्वं जनकद्वारेण न स्व(२)रूपेण। तेषां वर्णजातिलक्षणाभावस्योक्तत्वात्। तथानुलोमजानां मूर्धावसिक्तादीनामौरसेष्वन्तर्भावात्तेषामप्यभावे क्षेत्रजादीनां दायहरत्वं बोद्धव्यम्। शूद्रापुत्रस्त्वौरसोऽपि कृत्स्नं भागमन्याभावेऽपि न लभते। यथाह मनुः (९।१५४)—'यद्यपि स्यात्तु सत्पुत्रो (३)यद्यपुत्रोऽपि वा भवेत्। नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः'॥ इति। यदि सत्पुत्रो विद्यमानद्विजातिपुत्रो यद्यपुत्रोऽविद्यमानद्विजातिपुत्रो वा स्यात्तस्मिन्मृते क्षेत्रजादिर्वान्यो वा सपिण्डः शूद्रापुत्राय तद्धनाद्दशमांशादधिकं न दद्यादित्यस्मादेव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सकलधनग्रहणं गम्यते॥

(मिता०) अधुना शूद्रधनविभा(४)गे विशेषमाह—

जातोऽपीत्यादि। शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरि-

(१) (मनुः ८।१६०) 'दानप्रतिभुवि प्रेते' इति पूर्वार्धमस्य। दानप्रतिभुवि तु पितरि मृते पुत्रं ऋणं दापयेदिति तस्यार्थः। (२) स्वरूपद्वारेण ग.। (३) व्यसत्पुत्रोऽपि वा भवेदिति पाठः।
(४) विभागेपि ग.।

च्छया भागं लभते। पितुरूर्ध्वं तु यदि परिणीतापुत्राः सन्ति तदा ते भ्रातरस्तं दासीपुत्रं अर्धभागिनं कुर्युः। स्वभागादर्धं दद्युरित्यर्थः। अथ परिणीतापुत्रा न सन्ति तदा कृत्स्नं (१)धनं दासीपुत्रो गृह्णीयात् यदि परिणीताडुहितरस्तत्पुत्रा वा न सन्ति। तत्सद्भावे त्वर्धभागिक एव दासीपुत्रः। अत्र च शूद्रग्रहणाद्विजातिना दास्यामुत्पन्नः पितुरिच्छयाप्यंशं न लभते नाप्यर्धं, दूरत एव कृ(२)त्स्नम्। किंत्वनुकूलश्चेज्जीवनमात्रं लभते ॥ १३३-१३४ ॥

(वी० मि०) अथ द्वादशविधपुत्राभावे धनग्राहिणो निरूपयति—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥
तत्सुतो(३) गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥१३५॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ॥
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ १३६ ॥

अपुत्रस्य द्वादशविधपुत्रहीनस्य पौत्रप्रपौत्रहीनस्य स्वर्यातस्य मृतस्य पत्न्यादीनामेषामुक्तानां मध्ये पूर्वपूर्वाभावे उत्तरोत्तरो धनभाग् भवतीत्ययं विधिरपुत्रधनग्रहणप्रकारः सर्ववर्णेषु तुल्यः। तत्र प्रथमं पत्नी धनभाक्, सा च विवाहसंस्कृता बोध्या। 'पत्युर्नो यज्ञसंयोगे' (पा०सू०४।१।३३) इति स्मरणात्। अत्र विशेषमाह कात्यायनः—

पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा ॥

पत्न्या व्यभिचारिणीत्वे त्वाह नारदः—

पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात्।

पत्न्यसत्त्वेऽनूढाः पितृसवर्णदुहितरो धनभागिन्यः, उक्तकात्यायनवचनात्। इदं पुत्रिकापरमिति केचित्। तदयुक्तं पत्नीसत्त्वेऽपि तस्या धनग्राहितत्वात्। 'तृतीया पुत्रिके'ति वसिष्ठवचनेन तस्याः पुत्रत्वबोधनात्।

अङ्गादङ्गात्स भवति पुत्रवद् दुहिता नृणाम्।
तस्यामात्मनि जीवत्यां कथमन्यो धनं हरेत ॥

---

(१) धनं गृह्णीयात ग. घ.। (२) कृत्स्नं धनं ग.।

(३) तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः—इति मुद्रितपुस्तके पाठः।

सदृशी सदृशोनोढा साध्वी शुश्रूषणे रता ।
कृताऽकृता वा पुत्रस्य पितुर्धनहरी मता ॥

इति बृहस्पतिवचनाच्च । अत्र चोढात्वं कृताया एव विशेषणं, न त्वकृताया अपि कात्यायनवचनानुरोधादिति दाक्षिणात्याः । वस्तुतस्तु अक्लीबा चाऽकृता मानसीपुत्रिका सन्दिग्धतया पुत्रमध्येऽपरिगणिते वाऽत्र दुहितृपदार्थः । 'निरिन्द्रियाया अदायः स्त्रियः' इत्यौत्सर्गिकवचनात् ।

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा ।

इति मनुवचनस्य सङ्कोचलाघवाच्चेति मैथिलादीनामाचारानुसारी पन्थाः । पितरौ मातापितरौ । तत्र 'निरिन्द्रिया' इत्यादिवच्च तद्भयात्—

अपुत्रस्याऽथ कुलजा पत्नी दुहितरोऽपि वा ।
तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः ॥

इति कात्यायनीयपाठक्रमाच्च । यद्यपि पितुस्तदसत्त्वे च मातुर्धनभागित्वम् । 'अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामी'ति विष्णुवचनेन चैतदिति स्फुटम् । इत्थं च विग्रहवाक्ये 'मातृशब्दस्य पूर्वनिपातात् पित्रपेक्षया वैमात्रेयाजनकत्वेन साधारणप्रत्यासत्तिसत्त्वाच्चे'ति मिताक्षरालिखनं चिन्त्यम् । मातुरभावे सहोदरास्तदभावे भ्रातृसुतः तदभावे गोत्रजः सपिण्डकुल्यादिर्यथासन्निहितसम्बन्धः, तदभावे बन्धुः—

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥

इति परिभाषितः । तदभावे शिष्यस्तदभावे सब्रह्मचारी एकस्मादाचार्यात्प्राप्तोपनयनवेदाऽध्ययनः । अत्र चकारेण सहोदरभ्रात्रभावे वैमात्रेयभ्रातुरधिकारं, तथापदेनात्मबन्धूनामभावे पितृबन्धूनां तदभावे मातृबन्धूनां परिभाषितानां तदभावे आचार्यस्य चाऽधिकारं समुच्चिनोति । सम्बन्धसान्निध्यात् 'आचार्याभावेऽन्तेवासी'त्यापस्तम्बवचनाच्चेति संक्षेपः । नारदः—

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥
अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः ।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः ॥–॥१३५–१३६ ॥

(मिता०) मुख्यगौणसुता दायं गृह्णन्तीति निरूपितम् । तेषामभावे सर्वेषां दायादक्रम उच्यते—

पत्नीत्यादि । पूर्वोक्ता द्वादशपुत्रा यस्य न सन्ति असावपुत्रः तस्यापुत्रस्य स्वर्यातस्य परलोकं गतस्य धनभाक् धनग्राही एषां पत्न्यादीनामनुक्रान्तानां मध्ये पूर्वस्य पूर्वस्याभावे उत्तरोत्तर इति सम्बन्धः । सर्वेषु मूर्धावसिक्तादिषु(१) अनुलोमजेषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिषु अयं दायग्रहणविधिर्दायग्रहणक्रमो वेदितव्यः । तत्र प्रथमं पत्नी धन(२)भाक् । पत्नी विवाहसंस्कृता 'पत्युर्नो यज्ञसंयोगे' इति स्मरणात् । एकवचनं च जात्यभिप्रायेण । ताश्च बह्वयश्चेत्सजातीया विजातीयाश्च तदा यथांशं विभज्य धनं गृह्णन्ति(३) । वृद्धमनुरपि पत्न्याः समग्रधन(४)सम्बन्धं वक्ति—'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च' ॥ इति । बृहद्विष्णुरपि—'अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि' इति । कात्यायनोऽपि—'पत्नी पत्युर्धनहरी या स्यादव्यभिचारिणी । तदभावे तु दुहिता यद्यनूढा भवेत्तदा' ॥ इति । तथा 'अपुत्रस्या(५)थ कुलजा पत्नी दुहितरोऽपि वा । तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः' इति । बृहस्पतिरपि—'कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु । । असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी' ॥ एतद्विरुद्धानीव(६) वाक्यानि लक्ष्यन्ते—'भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा । विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥ भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् । रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तु' ॥ इति । पत्नीसद्भावेऽपि भ्रातृणां धनग्रहणं पत्नीनां च भरणमात्रं नारदेनोक्तम् । मनुना तु (९।१८५)—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इत्यपुत्रस्य धनं पितुर्भ्रातुर्वेति दर्शितम् । तथा (मनुः ९।२१७)—'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् । मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्' ॥ इति मातुः पितामह्याश्च धनसम्बन्धो दर्शितः । शङ्खेनापि—'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां

(१) दिष्वनुलोमजेषु सूतादिषु प्रतिलोमजेषु ब्राह्मणादिषु अयं ग. । (२) भाक् विवाह ग. घ. । (३) गृह्णन्ति यथा ख. । (४) धनग्रहणं घ. । (५) स्यार्यकुलजा क. ख. । (६) नि चावाक्यानीह ग. ।

ज्येष्ठा वा पत्नी' इति भ्रातृणां पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसम्बन्धो दर्शितः। कात्यायनेनापि—'विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वाथ माता वा तत्पितुः क्रमात्' ॥ इति। एवमादीनां विरुद्धार्थानां वाक्यानां योगीश्वरेण व्यवस्था दर्शिता। 'पत्नी गृह्णीयात्' इत्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्। सा च यदि नियोगार्थिनी भवति। कुत एतत् नियोगसव्यपेक्षायाः पत्न्या धनहरणं न स्वतन्त्राया इति। 'पिता हरेदपुत्रस्य' इत्यादिवचनात्तत्र व्यवस्थाकारणं वक्तव्यम्। नान्यद्व्यवस्थाकारणमस्तीति। गौतमवचनाच्च 'पिण्डगोत्रर्षिसम्बन्धा रिक्थं भजेरन् स्त्री वाऽनपत्यस्य बीजं लिप्सेत' इति। अस्यार्थः—पिण्डगोत्रर्षिसम्बन्धा अनपत्यस्य रिक्थं भजेरन् स्त्री वा रिक्थं भजेत् यदि बीजं लिप्सेतेति। मनुरपि (९।१४६)—'धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा। सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्' ॥ इति। अनेनैतद्दर्शयति विभक्तधनेऽपि भ्रातर्युपरतेऽपत्यद्वारेणैव पत्न्या धनसम्बन्धो नान्यथेति। तथाऽविभक्तधनेऽपि (मनुः ९।१२०)—'कनीयान् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि। समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः' ॥ इति। तथा वसिष्ठोऽपि 'रिक्थलोभान्नास्ति नियोगः' इति रिक्थलोभान्नियोगं प्रतिषेधयन् नियोगद्वारक एव पत्न्याः धनसम्बन्धो नान्यथेति। नियोगाभावेऽपि पत्न्या भरणमात्रमेव नारदवचनात् 'भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्' इति। योगीश्वरेणापि किल वक्ष्यते—'अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च' ॥ इति। अपि च—द्विजातिधनस्य यथार्थत्वात्स्त्रीणां च यज्ञेऽनधिकाराद्धनग्रहणमयुक्तम्। तथा च केनापि स्मृतम्—'यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये। अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजनाः ॥ यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत्। स्थानेषु धर्मजुष्टेषु न स्त्रीमूर्खविधर्मिषु' ॥ इति। तदनुपपन्नम्, 'पत्नी दुहितरः' इत्यत्र नियोगस्याप्रतीतेरप्रस्तुतत्वाच्च। अपि चेदमत्र वक्तव्यम्। पत्न्याः धनग्रहणे नियोगो वा निमित्तं तदुत्पन्नमपत्यं वा। तत्र नियोगस्यैव निमित्तत्वे अनुत्पादितपुत्राया अपि धनसम्बन्धः प्राप्नोति। उत्पन्नस्य च पुत्रस्य धनसम्बन्धो न प्राप्नोति। अथ तदपत्यस्यैव निमित्तत्वं, तथा सति

पुत्रस्यैव धनसम्बन्धात्पत्नीति नारब्धव्यम् ॥

अथ स्त्रीणां पतिद्वारको धनसम्बन्धः पुत्रद्वारको वा नान्यथेति मतम् । तदप्यसत् । (मनुः ९।१९४)—'अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ' ॥ इत्यादिविरोधात् । किं च—सर्वथा पुत्राभावे 'पत्नी दुहितरः' इत्यारब्धम् । तत्र नियुक्ताया धनसम्बन्धं वदता क्षेत्रजस्यैव धनसम्बन्ध(१) उक्तो भवति । स च प्रागेवाभिहित इति 'अपुत्रप्रकरणे पत्नी'ति नारब्धव्यम् ।

अथ 'पिण्डगोत्रर्षिसम्बन्धा रिक्थं भजेरन् स्त्री वानपत्यस्य वीजं वा लिप्सेत' इति गौतमवचनान्नियुक्ताया धनसम्बन्ध इति । तदप्यसत् । न हि यदि वीजं लिप्सेत तदाऽनपत्यस्य स्त्री धनं गृह्णीयादित्ययमर्थोऽस्मात्प्रतीयते । किन्तु 'अनपत्यस्य धनं पिण्डगोत्रर्षिसम्बन्धा भजेरन् स्त्री वा सा(२) स्त्री वीजं वा लिप्सेत संयता वा भवेत् ' इति तस्या धर्मान्तरोपदेशः । वाशब्दस्य पक्षान्तरवचनत्वेन यद्यर्थाप्रतीतेः ।

अपि च संयताया एव धनग्रहणं युक्तं न नियुक्तायाः स्मृतिलोकनिन्दितायाः । 'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च' ॥ इति संयताया एव धनग्रहणमुक्तम् ।

तथा नियोगश्च निन्दितो मनुना (९।६४)—'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ' ॥ इत्यादिना । यत्तु वसिष्ठवचनम् 'रिक्थलोभान्नास्ति नियोगः' इति, तदविभक्ते संसृष्टिनि वा भर्तरि प्रेते तस्या धनसम्बन्धो नास्तीति स्वापत्यस्य धनसम्बन्धार्थं नियोगो न कर्तव्य इति व्याख्येयम् । यदपि नारदवचनम्—'भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ' इति, तदपि 'संसृ(३)ष्टानां तु यो भागस्तेषामेव स इष्यते' इति संसृष्टानां प्रस्तुतत्वात्स्त्रीणामनपत्यानां भरणमात्रप्रतिपादनपरम् । न च 'भ्रातृणामप्रजाः प्रेया'दित्येतस्य संसृष्टिविषयत्वे 'संसृ(३)ष्टानां तु यो भाग' इत्यनेन पौनरुक्त्यमाशङ्कनीयम् । यतः पूर्वोक्तविवरणेन स्त्रीधनस्या·

(१) सम्बन्धो युक्तो घ. । (२) सा वीजं वा घ. । (३) संसृष्टिनां तु. घ. ।

विभाज्यं तत्स्त्रीणां च भरणमात्रं विधीयते । यदपि 'अपुत्रा योषितश्चैषाम्' इत्यादिवचनं तत् क्लीबादिस्त्रीविषयमिति व(१)क्ष्यते । यत्तु 'द्विजातिधनस्य यज्ञार्थत्वात् स्त्रीणां च यज्ञेऽनधिकाराद्धनग्रहणमयुक्तमिति, तदसत् । सर्वस्य द्रव्यजातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः ।

अथ यज्ञशब्दस्य धर्मोपलक्षणत्वाद्दानहोमादीनामपि धर्मत्वात्तदर्थत्वमविरुद्धमिति मतम् । एवं तर्ह्यर्थकामयोर्धनसाध्ययोरसिद्धिरेव स्यात् । तथा सति 'धर्ममर्थं च कामं च यथाशक्ति न हापयेत्,' । तथा 'न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्याद्यथाशक्ति धर्मार्थकामेभ्यः' । तथा 'न तथैतानि शक्यन्ते संनियन्तुमसेवया, इत्यादियाज्ञवल्क्यगौतममनुवचनविरोधः । अपि च धनस्य यज्ञार्थत्वे हिरण्यं धार्यमिति हिरण्यधारणस्य क्रत्वर्थतानिराकरणेन पुरुषार्थत्वमुक्तं' तत्प्रत्युद्धृतं स्यात् । किं च यज्ञशब्दस्य धर्मोपलक्षणपरत्वे स्त्रीणामपि पूर्तधर्माधिकाराद्धनग्रहणं युक्ततरम् । यत्तु पारतंत्र्यवचनं 'न स्त्री स्वातन्त्र्यमर्हति' इत्यादि, तदस्तु पारतन्त्र्यं, धनस्वीकारे तु को विरोधः । कथं तर्हि 'यज्ञार्थं द्रव्यमुत्पन्नम्' इत्यादिवचनम्, उच्यते— 'यज्ञार्थमेवार्जितं यद्धनं तद्यज्ञ एव नियोक्तव्यं पुत्रादिभिरपी'त्येवंपरं तत् । 'यज्ञार्थं लब्धमददद्भासः काकोपि वा भवेत्' इति दोषश्रवणस्य पुत्रादिष्व(२)विशेषात् । यदपि कात्यायनेनोक्तम्—'अदा(३)यिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम् । अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्' ॥ इति । अ(३)दायिकं दायादरहितं यद्धनं तद्राजगामि राज्ञो भवति, योषिद्भृत्यौर्ध्वदेहिकमपास्य, तत्स्त्रीणामशनाच्छादनोपयुक्तं और्ध्वदेहिकं धनिनः श्राद्धाद्युपयुक्तं चापास्य परिहृत्य राजगामि भवतीति सम्बन्धः । अस्यापवा(४)द उत्तरार्धे । 'श्रोत्रियद्रव्यं च योषिद्भृत्यौर्ध्वदेहिकमपास्य श्रोत्रियायोपपादये'दिति । एतदप्यवरुद्धस्त्रीविषयम् । योषिद्ग्रहणात् । नारदवचनं च-'अन्यत्र ब्राह्मणात् किंतु राजा धर्मपरायणः । तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः' ॥ इत्यवरुद्धस्त्रीविषयमेव । स्त्रीशब्दग्रहणात् । इह तु पत्नीशब्दादूढायाः संयताया धनग्रहणमविरुद्धम् । तस्माद्विभक्तासंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णातीत्ययमर्थः सिद्धो भवति । विभागस्योक्त-

(१) वक्ष्यति घ० (२) दिष्वप्यविशेषात् घ. ।
(३) आदायकं घ. । (४) ऽपवादः । श्रोत्रिय ख. घ. ।

त्वात्संसृष्टिनां तु वक्ष्यमाणत्वात् । एतेनाल्पधनविषयत्वं श्रीक(१)राादिभिरुक्तं निरस्तं वेदितव्यम् । तथा ह्यौरसेषु पुत्रेषु सत्स्वपि जीवद्विभागे अजीवद्विभागे च पत्न्याः पुत्रसमांशग्रहणमुक्तम्—'यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः' इति । तथा—'पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्' इति च । तथा सति अपुत्रस्य स्वर्यातस्य धनं पत्नी भरणादतिरिक्तं न लभत इति व्यामोहमात्रम् । अ(२)थ 'पत्न्यः कार्याः समांशिकाः' इत्यत्र 'माताप्यंशं समं हरेत्' इत्यत्र च च जीवनोपयुक्तमेव ध(३)नं स्त्री हरतीति मतम् । तदसत् । अंशशब्दस्य समशब्दस्य चाऽऽनर्थक्यप्रसङ्गात् । स्यान्मतम् । वहुधने जीवनोपयुक्तं धनं गृह्णाति, अल्पे तु पुत्रांशसमांशं गृह्णातीति । तच्च न विधिवैषम्यप्रसङ्गात् । तथा हि 'पत्न्यः कार्याः समांशिकाः' 'माताप्यंशं समं हरेत्' इति च वहुधने जीवनमात्रोपयुक्तं वाक्यान्तरमपेक्ष्य प्रतिपादयति, अल्पधने तु पुत्रांशसममंशं प्रतिपादयतीति ।

य(४)था चातुर्मास्येषु 'द्व(५)योः प्रणयन्ति' इत्यत्र पूर्वपक्षिणा सौमिकप्रणयनातिदेशो हेतुत्वेन प्राप्तया उत्तरवेद्या 'न वैश्वदेवे उत्तरवेदिमुपकिरन्ति न शुनासीरीये' इत्युत्तरवेदिप्रतिषेधे दर्शिते राद्धान्तैकदेशिना 'न सौमिकप्रणयनातिदेशप्राप्ताया उत्तरवेद्याः प्रथमोत्तमयोः पर्वणोरयं प्रतिषेधः किन्तु—उपात्र(६)वपन्तीति प्राकरणिकेन वचनेन प्राप्ताया उत्तरवेद्याः प्रतिषेधोऽयमित्यभिहिते पुनः पूर्वपक्षिणा-उपात्र वपन्तीति प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकीमुत्तरवेदिं प्रा(७)पयति, मध्यमोस्तु निरपेक्षमेव नित्यवदुत्तरवेदिं प्रापयती'ति विधिवैषम्यं दर्शितम् । राद्धान्तेऽपि विधिवैषम्यभयात्प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधो नित्यानुवादो द्वयोः प्रणयन्तीत्याद्यर्थवादपर्यालोचनया—उपात्र वपन्तीति मध्यमयोरेव वरुणप्रघाससाकमेधपर्वणोरुत्तरवेदिं विधत्त इति दर्शितम् ।

यदपि मतम् (मनुः ९।१८५)—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति मनुस्मरणात्, तथा—'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि

(१) श्रीकरादिभिः घ. । (२) तथा पत्न्यः घ. । (३) स्त्रीधनमिति मतं घ. । (४) तथा ख. ।
(५) द्वयोर्वरुणप्रघाससाकमेधपर्वणोः ।
(६) तूपात्त ख. तूपात्रं घ.. तूपात्रमित्येकस्मिन्प्राचीनपुस्तके. ।
(७) प्रतिपादयति. ग. घ. ।

द्रव्यं तदभावे पितरौ हरेया(१)तां ज्येष्ठा वा पत्नी' इति शङ्खस्मरणाच्च अ(२)पुत्रस्य धनं भ्रातृगामीति प्राप्तं, 'भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्' । इत्यादिवचनाच्च भरणोपयुक्तं धनं पत्नी लभत इत्यपि स्थितम् । एवं स्थिते बहुधने अपुत्रे स्वर्याते भरणोपयुक्तं पत्नी गृह्णाति शेषं च भ्रातरः । यदा तु पत्नीभरणमात्रोपयुक्तमेव द्रव्यमस्ति ततो न्यूनं वा तदा किं पत्न्येव गृह्णात्युत भ्रातरोऽपीति विरोधे पूर्वबलीयस्त्वज्ञापनार्थं 'पत्नी दुहितर' इत्यारब्धमिति । तदप्यत्र भगवानाचार्यो न मृष्यति । यतः (मनुः ९।१८५)—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति विकल्पस्म(३)रणान्नेदं क्रमपरं वचनमपि तु धनग्रहणेऽधिका(४)रप्रदर्शनमात्रपरम् । तच्चासत्यपि पत्न्यादिगणे घटत इति व्याचचक्षे । शङ्खवचनमपि संसृ(५)ष्टभ्रातृविषयमिति । अपि चाल्पविषयत्वमस्माद्वचनात्प्रकाराद्वा नावगम्यते । 'धनभागुत्तरोत्तरः' इत्यस्य च 'पत्नी दुहितर' इति विषयद्वये वाक्यान्तरमपेक्ष्याल्पधनविषयत्वम्, पित्रादिषु तु धनमात्रविषयत्वमिति पूर्वोक्तं विधिवैषम्यं तदवस्थमेवेति यत्किंचिदेतत् । यत्तु हारीतवचनम्—'विधवा यौवनस्था चेन्नारी भवति कर्कशा । आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा' ॥ इति, तदपि शङ्कितव्यभिचारायाः सकलधनग्रहणनिषेधपरम् । अस्मादेव व(६)चनादनाशङ्कितव्यभिचारायाः सकलधनग्रहणं गम्यते । एतदेवाऽभिप्रेत्योक्तं शङ्खेन 'ज्येष्ठा वा पत्नी' इति । ज्येष्ठा गुणज्येष्ठा अनाशङ्कितव्यभिचारा, सा सकलं धनं गृहीत्वान्यां कर्कशामपि मातृवत्पालयतीति सर्वमनवद्यम् । तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णातीति स्थितम् ।

तदभावे दुहितरः । दुहितर इति बहुवचनं समानजातीयानामसमानजातीयानां च समविषमांशप्राप्त्यर्थम् । तथा च कात्यायनः—'पत्नी भर्तुर्धनहरी या स्याद्व्यभिचारिणी । तदभावे तु दुहिता यद्यनूढा भवेत्तदा' ॥ इति । बृहस्पतिरपि—'भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता । अङ्गादङ्गात्सम्भवति पुत्रवद् दुहिता नृणाम् ॥ त-

(१) हरेतां घ. । (२) अपुत्रधनं घ. । (३) श्रवणात् घ. ।
(४) धिकारमात्रप्रदर्शनपरं घ. । (५) संसृष्टविषयं घ. । (६) वचनादशङ्कित ख. ।

स्मात्पितृधनं त्वन्यः कथं गृह्णीत मानवः' ॥ इति । तत्र चोढानूढासमवायेऽनूढैव गृह्णाति । 'तदभावे तु दुहिता यद्यनूढा भवेत्तदा' इति विशेषस्मरणात् । तथा प्रतिष्ठिताप्रतिष्ठितानां समवाये (१)अप्रतिष्ठिता । 'स्त्री(२)धनं दुहितृणामप्रत्तानामप्रतिष्ठितानां च' इति गौतमवचनस्य पितृधनेऽपि समानत्वात् । न चैतत्पुत्रिकाविषयमिति मन्तव्यम् । तत्समः पुत्रिकासुत इति पुत्रिकायास्तत्सुतस्य चौरससमत्वेन पुत्रकारणेऽभिधानात् । चशब्दाद् दुहित्रभावे दौहित्रो धनभाक् । यथाह विष्णुः-'अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः । पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रिका मताः' ॥ इति । मनुरपि [९।१३६]-'अ(३)कृता वा कृता वापि यं विन्देत्सदृशात्सुतम् । पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्' ॥ इति ।

तदभावे पि(४)तरौ मातापितरौ धनभाजौ । यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वं श्रवणात् पाठक्रमादेवार्थक्रमावगमाद्धनसम्बन्धेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक् तदभावे पितेति गम्यते । किञ्च पिता पुत्रान्तरेष्वपि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयात् 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति वचनान्मातुरेव प्रथमं धनग्रहणं युक्तम् । न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अ-

---

(१) अप्रतिष्ठिता अनपत्या निर्धना वा । (२) स्त्रीपदं पितुरप्युपलक्षकमिति संप्रदायविदः ।

(३) अकृतेति । अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्यं, तत्र 'यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्' इत्यभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृता, अभिसंधिमात्रकृता वाग्व्यवहारेण न कृता अकृता । इत्यादि कुल्लूकः. अक्षता वा क्षता वापि ग. ।

(४) व्यवहारमयूखे-दौहित्राभावे पिता तदभावे माता । तथा च कात्यायनः-'अपुत्रस्यार्यकुलजा पत्नी दुहितरोऽपि वा । तदभावे पिता माता भ्राता पुत्राः प्रकीर्तिताः' ॥ विष्णुश्च—'अपुत्रधनं पत्न्यभिगामि, तदभावे दुहितृगामि, तदभावे दौहित्रगामि, तदभावे पितृगामि, तदभावे मातृगामि, तदभावे भ्रातृगामि, तदभावे भ्रातृपुत्रगामि, तदभावे सकुल्यगामि' इति । यत्तु विज्ञानेश्वरः-द्वन्द्वापवादके पितरावित्येकशेषे क्रमाप्रतीतावपि तदर्थबोधके विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातात् अपवादद्वन्द्वात्क्रमानुसारात् पितुः पुत्रान्तरसाधारण्यात् मातुस्त्वसाधारण्याच्चादौ मातुस्तदभावे पितुर्धनग्रहणमूचे तदेतद्वचोविरोधादपास्तम् । विग्रहवाक्ये मातृशब्दस्य पूर्वनिपात एकशेषस्य द्वन्द्ववैकल्पिकत्वेन तदपवादत्वे साधारण्यासाधारण्ययोः क्रमनियामकत्वे मानाभावाच्च ।

पि तु समानोदकादिष्वप्यविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेव वचनादवगम्यत इति । मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहणं युक्ततरम् । तदभावे पिता धनभाक् ।

पित्रभावे भ्रा[१]तरो धनभाजः । तथा च मनुः [९।८५]—'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इति । यत्पुनर्धारेश्वरेणोक्तम् [९।२१७]—'अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् । मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्' ॥ इति मनुवचनाज्जीवत्यपि पितरि मातरि वृत्तायां पितुर्माता पितामही धनं हरेन्न पिता । यतः पितृगृहीतं धनं विजातीयेष्वपि पुत्रेषु गच्छति, पितामहीगृहीतं तु सजातीयष्वेव गच्छतीति पितामह्येव गृह्णातीति । तदप्याचार्यो नानुमन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात् 'चतुस्त्रिद्व्येकभागाः स्युः' (मनुः ९।१८९) इत्यादिनेति । यत्पुनः—'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः' इति मनुस्मरणं तन्नृपाभिप्रायं न तु पुत्राभिप्रायम् । भ्रातृष्व(२)पि सोदराः प्रथमं गृह्णीयुः भिन्नोदराणां मात्रा विप्रकर्षात् । 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति स्मरणात् ।

सोदराणामभावे भिन्नोदरा धनभाजः । भ्रातृणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः । भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः । भ्रात्रभावे भ्रातृपुत्राणामधिकारवचनात् । यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातृणामविशेषेण धनसम्बन्धे जाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता मृतस्तदा तत्पुत्राणां पितृतोऽधिकारे प्राप्ते तेषां भ्रातृणां च विभज्य धनग्रहणे पितृतो भागकल्पनेति युक्तम् ।

भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः । गोत्रजाः पितामही सपिण्डाः समानोदकाश्च । तत्र पितामही प्रथमं धनभाक् । (मनुः ९।२१७)—'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्' इति मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यन्तानां व द्धक्रमत्वेन मध्येऽनुप्रवेशाभावात् 'पितुर्माता धनं हरेत्' इत्यस्य

---

(१) अत्र केचन–सोदराभावे भिन्नोदरास्तदभावे सोदरसुता इत्याहुस्तन्न ।

(२) भ्रातृपदस्य सोदरे शक्त्या भिन्नोदरे च गौण्या वृत्तिद्वयविरोधात् । केचित्तु भ्रातर इत्यत्र 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इत्यनुशासनात् भ्रातरश्च स्वसारश्च भ्रातर इति विरूपैकशेषेण भ्रात्रभावे भगिन्य इत्याहुस्तन्न । विरूपैकशेषे मानाभावात् ।

वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानन्तरं पितामाही गृह्णातीत्यविरोधः। पितामह्याश्चाभावे समानगोत्रजाः (१)सपिण्डाः पितामहादयो धनभाजः। भिन्नगोत्राणां सपिण्डानां बन्धुशब्देन ग्रहणात्। तत्र च पितृसन्तानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः। पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमासप्तमात्समानगोत्राणां सपिण्डानां धनग्रहणं वेदितव्यम्। तेषामभावे समानोदकानां धनसम्बन्धः। ते च सपिण्डानामुपरि सप्त वेदितव्याः। जन्मनामज्ञानावधिका वा। यथाह बृहन्मनुः—'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु निवर्तेताचतुर्दशात्॥ जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते'॥ इति।

गोत्रजाभावे बन्धवो धनभाजः। बन्धवश्च त्रिविधाः आत्मबन्धवः पितृ(२)बन्धवो मातृबन्धवश्चेति। यथोक्तम्—'आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः। आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेया पितृबान्धवाः॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेयाः मातृबान्धवाः'॥ इति। तत्र चान्तरङ्गत्वात्प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदि(३)तव्यः। बन्धूनाम-

(१) तदभावे भगिनी 'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' इति मनूक्तेः। 'बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा। यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत्'॥ इति बृहस्पत्युक्तेः। तस्या अपि भ्रातृगोत्रोत्पन्नत्वेन गोत्रजत्वाविशेषाच्च। सगोत्रता परं नास्ति न च सात्र धनग्रहणप्रयोजकत्वेनोक्ता इति व्य० मयूखः।

(२) मनुस्मृतौ 'तदभावे सकुल्यः स्यादाचार्यः शिष्य एव वा' इत्यत्र सकुल्यशब्देन सगोत्रसमानोदकानां मातुलादीनां बन्धुत्रयस्य ग्रहणम्। योगीश्वरवचनेऽपि बन्धुपदेन मातुललक्षणमन्यथा मातुलादीनामग्रहणमेव प्रसज्येतेति तत्पुत्राणां धनाधिकारस्ततः प्रत्यासन्नानां तेषां स नेति महदनौचित्यमापद्येत।

(३) ननु पत्न्यादीनां सर्वेषां मृतनिरूपितानामेव धनभाक्त्वं बान्धवानामपि तथैवास्तु अतः कथं पितुर्मातुश्च बान्धवानां धनसम्बन्धः, 'पितुः पितृष्वसुः पुत्राः' इत्यादि तु संज्ञासंज्ञिसम्बन्धमात्रार्थं न धनसम्बन्धार्थमिति चेदुच्यते। विनाप्येतद्वचनं पितृमातुलपितृव्यादिष्विव पितृमातृबान्धवेष्वपि योगेनैव तच्छब्दप्रवृत्तिसम्भवे संज्ञासंज्ञिसम्बन्धबोधनानर्थक्यापत्तेः। तेन बन्धूनुद्दिश्य धनसम्बन्धविधौ पितृमातृबन्धुप्रापणेनैव वचोर्थवत्त्वा। बन्धूद्देशेनाशौचादिविधावप्येवमेवेति दिक्।

भावे आचार्यः तदभावे शिष्यः । पुत्राभावे यः प्रत्यासन्नः सपिण्डस्तदभावे आचार्यः। आचार्याभावेऽन्तेवासीत्यापस्तम्बस्मरणात्।

शिष्याभावे सब्रह्मचारी धनभाक्। येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी । तदभावे ब्राह्मणद्रव्यं यः कश्चित् श्रोत्रियो गृह्णीयात् । 'श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्' इति गौतमस्मरणात्। तदभावे ब्राह्मणमात्रम् । यथाह मनुः (९।१८८)—'सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः । त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते' ॥ इति । न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात (९।१८९)—'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः' इति मनुवचनात् । नारदेनाप्युक्तम्—'ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा' ॥ इति । क्षत्रियादिधनं सब्रह्मचारिपर्यन्तानामभावे राजा हरेत्, न ब्राह्मणः। यथाह मनुः (९।१८९)—'इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः' । (१)इति ॥१३५–१३६॥

---

(१) वीरमित्रोदये तु—अत्रायं मृतपुंधनाधिकारक्रमः । तत्र प्रथमं पुत्रः तदभावे पौत्रः तदभावे प्रपौत्रः । मृतपितृकपौत्रमृतपितृपितामहकप्रपौत्रयोस्तु पुत्रेण सह युगपदाधिकारः । प्रपौत्रपर्यन्ताभावे पत्नी। सा च प्राप्तभर्तृदाया भर्तृकुलं तदभावे पितृकुलं वा समाश्रिता सती शरीररक्षार्थं भर्तृदायं भुञ्जीत । तथा भर्तुरुपकारार्थं यथाकथंचिद्दानादिकमपि कुर्वीत । न तु स्त्रीधनवत्स्वच्छन्दं विनियुञ्जीत । तदभावे दुहिता । तत्र प्रथमं कुमारी तदभावे वाग्दत्ता तदभावे चोढा । सा च पुत्रवती संभावितपुत्रा च द्वे युगपदेवाधिकारिण्यौ । वन्ध्या विधवा च पुत्रहीना नाधिकारिणी । ऊढाया अभावे दौहित्रः । तदभावे पिता तदभावे भ्राता । तत्रापि प्रथमं सोदरः तदभावे वैमात्रेयः । मृतस्य भ्रातृसंसृष्टत्वे तु सोदरमात्रविषये प्रथमं संसृष्टसोदर एवाधिकारी तदभावे चासंसृष्टसोदरः । एवं वैमात्रेयमात्रविषये प्रथमं संसृष्टवैमात्रेयः तदभावे चासंसृष्टवैमात्रेयः । यदा तु संसृष्टः तदा तावुभौ तुल्यवदधिकारिणौ । भ्रातृणामभावे भ्रातुः पुत्रः । तत्रापि प्रथमं सोदरभ्रातृपुत्रः तदभावे वैमात्रेयभ्रातृपुत्रः । संसर्गे तु सोदरभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टसोदरभ्रातृपुत्रः तदभावे चासंसृष्टसोदरभ्रातृपुत्रः । वैमात्रेयभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टवैमात्रेयभ्रातृपुत्रः । तदभावे चासंसृष्टवैमात्रेयभ्रातृपुत्रः । यदा तु सोदरभ्रातृपुत्रोऽसंसृष्टो वैमात्रेयभ्रातृपुत्रश्च संसृष्टः तदा द्वौ भ्रातृवत्तुल्याधिकारिणौ । भ्रातृपुत्राभावे तु भ्रातृपौत्रः । तत्रापि भ्रातुः सोदरासोदरक्रमः संसर्गासंसर्गक्रमश्च बोध्यः । तदभावे पितृदौहित्रः । स च सोदरभगिनीपुत्रः तदभावे वैमात्रेयभगिनीपुत्रश्च । तदभावे पितुः सहोदरः । तदभावे पितुर्वैमात्रेयः । तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रपितृसोदरपौत्रपितृवैमात्रेयपौत्राणां क्रमेणाधिकारः । तदभावे पितामहदौहित्रः तत्रापि पितृसोदरभगिनीपुत्रः वैमात्रेयभगिनीपुत्रश्च । वक्ष्यमाणप्रपितामहदौहित्राधिकारेऽप्येवम् । तदभावे पितामहः । तदभावे पितामही । तदभावे पितामहसोदरभ्रातृवैमात्रेयभ्रातृतत्पुत्रपौत्रप्रपितामहदौहित्राः क्रमेणाधिकारिणः । एतावत्पर्यन्तानां

(वी० मि०) गृहस्थस्य धनग्राहिणः कथयित्वा वानप्रस्थादे-स्तानाह—

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः ॥
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥ १३७ ॥

अर्थस्य निचयं कुर्यात् कृतमाश्वयुजे त्यजेत् ।

इति वचनाद्वानप्रस्थस्य यद्रिक्थं,

योगसंभारभेदांश्च गृह्णीयात्पादुके तथा ।

इति वचनाद्यतेः रिक्थं, आच्छादनार्थं नैष्ठिकब्रह्मचारिणो यत् वस्त्रादि रिक्थं तद्भागिन आचार्यादयः क्रमेण पूर्वाभावे पर इति क्रमेण भवन्ति । आचार्यो गुरुः, सच्छिष्य आत्मश्रवणधारणादिक्षमः शिष्यः, एकतीर्थी एकस्माद्गुरोर्गृहीतविद्यः स एव च धर्माचरणे धाता पितृतुल्यस्य गुरोरेकत्वात् ॥ १३७ ॥

(मिता०) पुत्राः पौत्राश्च दायं गृह्णन्ति तदभावे पत्न्यादय इत्युक्तं, इदानीं तदुभयापवादमाह—

वानप्रस्थेति । वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यो धर्मभात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः । ब्रह्मचारी नैष्ठिकः उपकुर्वाणस्य तु धनं मात्रादय एव गृह्णन्ति । नैष्ठिकस्य तु धनं तदपवादत्वेनाचार्यो गृह्णातीत्युच्यते । यतेस्तु धनं सच्छिष्यो गृह्णाति । सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः । दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात् । वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति । धर्मभ्रा-

---

धनिभोग्यपिण्डदातृणां त्वभावे धनिदेयपिण्डभोक्तृणां मातुलादीनामधिकारस्तदभावे धनिमातृष्वस्रीयस्याधिकारः । तदभावे मातुलपौत्राणां क्रमेणाधिकारः । तदभावे चाधस्तनसकुल्यानां धनिभोग्यलेपदातृणां प्रतिप्रणप्तृप्रभृतिपुरुषत्रयाणां क्रमेणाधिकारः । तदभावे पुनरूर्ध्वतनसकुल्यानां धनिदेयलेपभोक्तृणां वृद्धप्रपितामहादिसन्ततीनामासत्तिक्रमेणाधिकारः । तदभावे समानोदकानामधिकारः । तेषामभावे चाचार्यस्य तदभावे शिष्यस्य तदभावे सहवेदाध्यायिब्रह्मचारिणोऽधिकारः । तदभावे चैकग्रामस्थसगोत्रसमानप्रवरयोः क्रमेणाधिकारः । उक्तपर्यन्तानां सर्वेषां संबन्धिनामभावे ब्राह्मणधनवर्जं राजा गृह्णीयात् । ब्राह्मणधनं तु त्रैविद्यादिगुणयुक्ता ब्राह्मणा गृह्णीयुः । एवं वानप्रस्थधनं भ्रातृत्वेनानुमतोऽपरो वानप्रस्थं एकतीर्थसेवी गृह्णीयात् । तथा यतिधनं सच्छिष्यः । नैष्ठिकब्रह्मचारिणो धनमाचार्यः । उपकुर्वाणस्य तु ब्रह्मचारिणो धनं पित्रादिर्गृह्णीयादिति ज्ञेयम् ।

तां प्रतिपन्नो भ्राता, एकतीर्थी एकाश्रमी, धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी । एतेषामाचार्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्येव गृह्णाति । ननु 'अनंशास्त्वाश्रमान्तरगताः' इति वसिष्ठस्मरणादाश्रमान्तरगतानां रिक्थसम्बन्ध एव नास्ति कुतस्तद्विभागः । न च नैष्ठिकस्य स्वार्जितधनसम्ब(१)न्धो युक्तः । प्रतिग्रहादिनिषेधात् । 'अनिचयो भिक्षुः' इति गौतमस्मरणात् भिक्षोरपि न स्वार्जि(२)तधनसम्बन्धसम्भवः । उच्यते—वानप्रस्थस्य तावत् 'अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा । अर्थस्य निचयं कुर्यात्कृतमाश्वयुजि त्यजेत्' ॥ इति वचनाद्धनसम्बन्धोऽस्त्येव । यतेरपि—'कौपीनाच्छादनार्थं (३)वा वासोऽपि बिभृयाद्व्रसः । योगसम्भारभेदांश्च गृह्णीयात्पादुके तथा' ॥ इत्यादिवचनाद्वस्त्रपुस्तकसम्बन्धोऽस्त्येव । नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसम्बन्धोऽस्त्येवेति तद्विभागकथनं युक्तमेव ॥ १३७ ॥

(वी० मि०) अपुत्रस्य स्वर्यातस्य पत्न्यादिर्धनभागित्युक्तमपवदति—

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ॥
दद्यादपहरेच्चांऽशं जातस्य च मृतस्य च ॥ १३८ ॥
अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् ॥
असंसृष्ट्यपि (४)चाऽऽदद्यात् संसृष्टो नान्यमातृजः ॥ १३९ ॥

संसृष्टी—

विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः ।
पितृव्येणाऽथवा प्रीत्या स तत्संसृष्ट उच्यते ॥

इति बृहस्पतिनोक्तः संसृष्टधनवान् पुत्रहीनस्याऽपरस्य संसृष्टिनो मृतस्यांऽशमपहरेत् गृह्णीयात् न तु संसृष्टिनः पत्न्यादिः । जातस्य संसृष्टिमरणकाले गर्भस्थस्य पश्चादुत्पन्नस्य तु संसृष्टिपुत्रस्य तत्पितृसम्बन्धिधनमंशं दद्यात् । यस्य तु सोदरो वैमात्रेयश्च संसृष्टी तस्य सोदर एव संसृष्टी धनं हरेन्नान्योदर्यः संसृष्टी । अत्र

---

(१) सम्बन्धः प्रतिग्रहादिः घ. । (२) धनसम्भवः घ. ।
(३) हि वासोऽपि बिभृयात्तथा क. । (४) वा-इति मु० पु० पाठः ।

हेतुरसंसृष्ट्यपि संसृष्टसोदर एव पत्नीदुहितृहीनस्य धनं गृह्णाति, न तु तत्सत्त्वेऽन्यमातृज इति । तथा च संसृष्टत्वाविशेषेऽपि सम्बन्धसान्निध्यकृतोऽयं विशेष इति भावः । अपिचेत्यनेनाऽविभक्तस्य भ्रातुः सोदरस्य सत्वे पत्न्यादिर्धनं नाऽऽदद्यादिति प्राग्लिखितवसिष्ठवचनसिद्धमपवादं समुच्चिनोति । आद्येन तुशब्देन पत्न्यादेर्धनहारित्वं, द्वितीयेन पितृव्यादिसंसृष्टिनो धनहारित्वं, तृतीयेनाऽविभक्तवैमात्रेयस्य धनहारित्वाभावं व्यवच्छिनत्ति । चकारैः पत्न्यादिसत्त्वेऽपि संसृष्टिनो वैमात्रेयेसंसृष्टिसत्त्वे सोदरसंसृष्टिन एव, संसृष्टिसत्त्वेऽपि संसर्गोत्तरजातसंसृष्टिपुत्रस्य ऋणप्रदानं समुच्चिनोति ॥ १३८—१३९ ॥

(मिता०) इदानीं स्वर्यातस्य पुत्रस्य पत्न्यादयो धनभाज इत्यस्यापवादमाह—

संसृष्टिन इति । विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं तदस्यास्तीति संसृष्टी । संसृष्टत्वं च न येन केनापि किं तु पित्रा भ्राता पितृव्येण वा । यथाह बृहस्पतिः—'विभ(१)क्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः । पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते' ॥ इति । तस्य संसृष्टिनो मृतस्यांशं विभागं विभागकाले अविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य संसृष्टी दद्यात् । पुत्राभावे संसृष्ट्येवापहरेद् गृह्णीयान्न पत्न्यादिः ॥

(मिता०) संसृष्टिनस्तु संसृष्टीत्यस्यापवादमाह—

सोदरस्येति । संसृष्टिनः संसृष्टीत्यनुवर्तते । अतश्च सोदरस्य संसृ(२)ष्टिनो मृतस्यांशं सोदरः संसृष्टी संसृष्टानुजातस्य सुतस्य दद्यात् । तदभावे (३)अपहरेदिति पूर्ववत् सम्बन्धः । एवं च सोदरासोदरसंसर्गे सोदरसंसृष्टिनो धनं सोदर एव संसृष्टी गृह्णाति न भिन्नोदरः संसृष्टयपीति पूर्वोक्तस्यापवादः ॥ १३८ ॥

(१) अत्र वाक्ये पितृभ्रातृपितृव्यैरेव सह संसृष्टता नान्येन । वचनेऽनुपादानादिति मिताक्षरादिषु विभागकर्तृसामानाधिकरण्येनैव सेति युक्तम् । पित्रादिपदानि तु विभागकर्तृमात्रोपलक्षकाणि 'अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदी' तिवत् । अन्यथा वाक्यभेदात् । तेन पत्नीपितामहभ्रातृपौत्रपितृव्यपुत्रादिभिरपि सह संसृष्टता भवति । विभक्तो य एकत्र स्थितः स संसृष्ट इति सामानाधिकरण्याद्विभक्तभ्रात्रोः पुत्रादीनां न संसर्गः । विद्यमानं भावि वा धनमावयोः पुनर्विभागावधि साधारणमित्याकारिका बुद्धिरिच्छा वा संसर्गः । व्य. मयूखः ।

(२) संसृष्टिनो धनं घ. । (३) दिति सम्बन्धः घ. ।

(मिता०) इदानीं संसृष्टिन्यपुत्रे स्वर्याते संसृष्टिनो भि(१)न्नोदरस्य सोदरस्य चासंसृष्टिनः सद्भावे कस्य धनग्रहणमिति विवक्षायां द्वयोर्विभज्य ग्रहणे कारणमाह—

अन्योदर्य इति । अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत् न पुनरन्योदर्यो धनं हरेदसंसृष्टी । अनेनाऽन्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे (२)कारणमुक्तं भवति । असंसृष्टीत्येतदुत्तरेणापि सम्बध्यते । अतश्चासंसृष्टचपि संसृष्टिनो धनमाददीत । कोऽसावित्यत आह—संसृष्ट इति । संसृष्टः एकोदरसंसृष्टः सोदर इति यावत् । अनेनासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तं, संसृष्ट इत्युत्तरेणापि सम्बध्यते । तत्र च संसृष्टः संसृष्टीत्यर्थः । नान्यमातृजः । अत्रैवशब्दाध्याहारेण व्याख्यानं कार्यम्, संसृष्ट्यप्यन्यमातृज एव संसृष्टिनो धनं नाददीतेति । एवं चासंसृष्ट्यपि वाऽऽदद्यादित्यपिशब्दश्रवणात् संसृष्टो नान्यमातृज एवेत्यवधारणनिषे(३)धाच्चासंसृष्टसोदरस्य संसृ(४)ष्टभिन्नोदरस्य च विभज्य ग्रहणं कर्तव्यमित्युक्तं भवति । द्वयोरपि धनग्रहणकारणस्यैकैकस्य सद्भावात् । एतदेव स्पष्टीकृतं मनुना (९।२१०)—'विभ(५)क्ताः सहजीवन्तो विभजेरन् पुनर्यदि' इति संसृष्टिविभागं प्रक्रम्य (९।२११।२१२)—'येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभजेयुस्तं समेत्य सहिताः समम् । भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः' ॥ इति वदता । येषां भ्रातॄणां मध्ये ज्येष्ठः कनिष्ठो वा मध्यमो वांशप्रदानतोऽशप्रदाने सार्वविभक्तिकस्तसिः, विभागकाले इति यावत् । हीयेत स्वांशात् भ्रश्येत आश्रमान्तरपरिग्रहेण ब्रह्महत्यादिना वा म्रियेत वा तस्य भागो न लुप्यते । अतः पृथगुद्धरणीयो न, संसृष्टिन एव गृह्णीयुरित्यर्थः । तस्योद्धृतस्य विनियोगमाह—सोदर्या विभजेयुस्तमिति । तमुद्धृतं भागं सोदर्याः सहोदरा असंसृष्टा अपि समेत्य देशान्तरगता अपि समागम्य सहिताः संभूय (६)समं न न्यूनाधिकभावेन । ये च भ्रातरो भिन्नोदराः संसृष्टास्ते च सना-

---

(१) भिन्नोदरस्यासंसृष्टिनः सोदरस्य च घ. । (२) मुक्तं । असंसृष्टी घ. ।

(३) निषेधादसंसृष्ट घ. । (४) संसृष्टिनो भिन्नोदरस्य च घ. ।

(५) संसृष्टाः सहजीवन्त इत्यपि पाठान्तरम् । (६) सममन्यूनाधिक. घ. ।

भयो भगिन्यश्च विभ(१)जेयुः । समं विभज्य गृह्णीयुरिति स्पष्टोऽर्थः ॥ १३९ ॥

(वी० मि०) पुत्रपत्न्यादिसंसृष्टिनां धनग्रहणापवादं कंचिदाह—

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः ॥
अन्धोऽचिकित्स्यरोगाद्या भर्तव्यास्ते (२)निरंशकाः ॥१४०॥

अथशब्दाज्जन्मावधिवधिरसमुच्चयः । आद्यपदेन मूकपितृद्विट्प्रभृतीनां समुच्चयः ।

अनंशौ क्लीबपतितौ जात्यन्धवधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥

इति मनुवचनात् ।

पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः ।
औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुतः ॥

इति नारदवचनाच्च । तज्जः पतितादुत्पन्नः, पङ्गुः पादविकलः, जडो मन्दान्तःसंज्ञः ॥ १४० ॥

(मिता०) पुत्रपत्न्यादिसंसृष्टिनां यद्दायग्रहणमुक्तं तस्यापवादमाह—

क्लीब इति । क्लीबस्तृतीयाप्रकृतिः । पतितो ब्रह्महादिः । तज्जः पतितोत्पन्नः । पङ्गुः पादविकलः । उन्मत्तकः वातिकपैत्तिकश्लैष्मिक(३)सांनिपातिकग्रहावेशलक्षणैरुन्मादैरभिभूतः । जडो विकलान्तःकरणः हिताहितावधारणाक्षम इति यावत् । अन्धो नेत्रेन्द्रियविकलः । अचिकित्स्यरोगोऽप्रतिसमाधेयय(४)क्ष्मादिरोगग्रस्तः । आद्यशब्देनाश्रमान्तरगतपितृद्वेष्युपपातकिवधिरमूकनिरिन्द्रियाणां ग्रहणम् । यथाह वसिष्ठः—'अनंशास्त्वाश्रमान्तरगताः' इति । नारदेनापि—'पितृद्विट् पतितः षण्ढो यश्च स्या(५)दौपपातिकः । औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजः कुतः' ॥ इति । मनुरपि (९।२०१)—'अनंशौ क्लीबपतितौ जात्यन्धवधिरौ तथा । उन्मत्तजडमूकाश्च ये च

(१) समं विभजयु ख. । (२) भर्तव्याः स्युर्निरं०—इति मुद्रितपुस्तके पाठः ।

(३) संनिपातग्रहा ख. । (४) क्षयादिरोग. घ ।

(५) स्यादपयात्रित इति पाठ । अपयात्रितो राजद्रोहाद्यपराधेन बन्धुभिर्घटस्फोटादिना बहिष्कृत इति मदन. । व्यवसायार्थं नावादिना समुद्रमध्ये द्वीपान्तर गत इति युक्तम् । 'द्विजस्याब्धौ तु नौयातुः शोधितस्याप्यसङ्ग्रहः' इति तस्य कलौ संसर्गनिषेधात् । राजद्रोहादौ घटस्फोटबहिष्कारयोरविधानाच्च । व्य. म. ।

केचिन्निरिन्द्रियाः' ॥ इति । निरिन्द्रियो निर्गतमिन्द्रियं यस्माद्व्याध्यादिना स निरिन्द्रियः । एते क्लीबादयोऽनंशाः रिक्थभाजो न भवन्ति । केवलमशनाच्छादनदानेन पोषणीया भवेयुः । अभरणे तु पतितत्वदोषः । (९।२०२)—'सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा । ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्' ॥ इति मनुस्मरणात् । अत्यन्तं यावज्जीवमित्यर्थः । एतेषां विभागात्प्रागेव दोषप्राप्तावनंशत्वमुपपन्नं न पुनर्विभक्तस्य । विभागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव । 'विभक्तेषु सुतो जातः सवर्णायां विभागभाक्' इत्यस्य समानन्यायत्वात् । पतितादिषु तु पुंलिङ्गत्वमविवक्षितम् । अतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोष(१)दुष्टानामनंशित्वं वेदितव्यम् ॥ १४० ॥

(वी०मि०) क्लीबादीनामनंशित्वात्तत्पुत्राणामप्यनंशित्वं तत्कन्यापत्न्यादिभरणानावश्यकत्वं च प्रसक्तमपाकरोति—

औरसाः क्षेत्रजा(२)स्तेषां निर्दोषाः भागहारिणः ॥
सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः ॥ १४१ ॥
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः ॥
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥ १४२ ॥

तेषां क्लीबादीनां क्षेत्रजाः क्लीबादीनामौरसाश्च पुत्राः क्लीबत्वादिदोषशून्याश्चेत्तदा भागहारिणो भवन्ति । एषां क्लीबादीनां क्षेत्रजाः क्लीबभिन्नाः कन्यका यावद्भर्तृसात्कृता वराय प्रतिपादितास्तावत्प्रकर्षेण स्वकन्यादिसादृश्येन भर्तव्याः । एषां क्लीबादीनां योषितश्च क्लीबत्वानिश्चयवशाद्विवाहिताः साधुवृत्तयः सदाचाराश्चेत्तदा भर्तव्याः । व्यभिचारिण्यः तथाऽतिशयेन प्रतिकूलाश्च निर्वास्या गृहान्निष्कासनीयाः । आद्येन चकारेण संस्कर्तव्या इति, द्वितीयेन सुरापानादिकारिण्य इति समुच्चीयते । एवकारेण भर्तव्यत्वं व्यवच्छिनत्ति ॥ १४१–१४२ ॥

(मिता०) क्लीबादीनामनंशित्वात्तत्पुत्राणामप्यनंशित्वे प्राप्ते इदमाह—

औरसा इति । एतेषां क्लीबादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषा

---

(१) दोषाणामनंशित्वं घ. । (२) क्षेत्रजास्त्वेषां—इति मु० पु० पाठः ।

अप्रजःस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि ॥
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत् ॥ १४५ ॥

अप्र(१)जायां विद्यमानदुहितृपुत्रान्यतरकाभिन्नायामतीतायां तत्स्त्रीधनं बान्धवास्तत्सम्बन्धिनोऽवाप्नुयुः । अत्र चायं विशेषः—ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेष्वप्रजायाः स्त्रिया धनं भर्तुः । शेषेषु चतुर्षु विवाहेषु, अपिशब्दाद्विवाहाभावेऽपि तद्धनं पितृगामि । यदि तु प्रसूता भवति पुत्रदुहितृविहीना च तदा दुहितॄणां च तद्धनं स्वं भवति । तदभावे च दौहित्रः प्रागन्वयपदेनाभिहितो धनभाक् । प्राक्लिखितमनुवचनेन दुहितृसत्त्वेऽपि दौहित्राणां किञ्चिदंशबोधनात् । अत्र ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम्—

अतीतायामप्रजसि भर्तुरेव तदिष्यते ।

इति मनुवचनाद्गान्धर्वविवाहे भर्तृपित्रोः समो भाग इति ध्येयम् ॥ १४४-१४५ ॥

(मिता०) एवं स्त्रीधनमुक्तं तद्विभागमाह—

अतीतायामिति । तत्पूर्वोक्तं स्त्रीधनमप्रजसि अनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां मृतायां बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णन्ति ॥ १४४ ॥

(मिता०) सामान्येन बान्धवा धनग्रहणाधिकारिणो दर्शिताः, इदानीं विवाहभेदेनाधिकारिभेदमाह—

अप्रजःस्त्रीति । अ(२)प्रजः स्त्रियाः पूर्वोक्तायाः ब्रह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्ताया अतीतायाः पूर्वोक्तं धनं प्रथमं भर्तुर्भवति । त(३)दभावे तत्प्रत्यासन्नानां सपिण्डानां भवति । शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजःस्त्रीधनं पितृगामि माता च पिता च पितरौ तौ गच्छतीति पितृगामि । एकशेषनिर्दिष्टाया अपि मातुः प्रथमं धनग्रहणं पूर्वमेवोक्तम् । तदभावे तत्प्रत्यासन्नानां धनग्रहणम् । सर्वेष्वेव विवाहेषु प्रसूतापत्यवती चेद् दुहितॄणां तद्धनं

(१) अप्रजायां—इत्यारभ्य तत्स्त्रीधनं—इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति ।

(२) अप्रजसः स्त्रियाः घ. ।

(३) भर्त्रभावतत्प्रत्यासन्नानां सपिण्डानां पित्रभावे च तत्प्रत्यासन्नानां सपिण्डानामिति, तत्रापि तेनास्याः प्रत्यासन्नास्तत्प्रत्यासन्नाः तद्द्वारा तत्कुले प्रत्यासन्ना इति यावत् ।

भवति। अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते, साक्षाद् दुहितॄणां 'मातुर्दुहितरः शेषम्' इत्यत्रोक्तत्वात्। अतश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गृह्णन्ति। तत्र चोढानूढासमवायेऽनूढैव गृह्णाति। तदभावे च परिणीता। तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति। तदभावे प्रतिष्ठिता। यथाह गौतमः—'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च' इति। तत्र चशब्दात्प्रतिष्ठितानां च। अप्रतिष्ठिता अनपत्या निर्धना वा। एतच्च शुल्कव्यतिरेकेण। शुल्कं तु सोदर्याणामेव। 'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः' इति गौतमवचनात्। सर्वासां दुहितॄणामभावे दुहितृदुहितरो गृह्णन्ति। 'दुहितॄणां प्रसूता चेत्' इत्यस्माद्वचनात्। तासां भिन्नमातृकाणां विषमाणां समवाये मातृद्वारेण भागकल्पना। 'प्रतिमातृतो वा स्व(१)वर्गेण भागविशेषः' इति गौतमस्मरणात्। दुहितृदौहित्रीणां समवाये दौहित्रीणां किंचिदेव दातव्यम्। यथाह मनुः (९।१९३)—'यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम्'॥ इति। दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। यथाह नारदः—'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः' इति। तच्छब्देन संनिहितदुहितृपरामर्शात्। दौहित्राणामभावे पुत्रा गृह्णन्ति। ताभ्य ऋतेऽन्वय इत्युक्तत्वात्। मनुरपि दुहितॄणां पुत्राणां च मातृधनसम्बन्धं दर्शयति (९।१९२)—'जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः'॥ इति। मातृकं रिक्थं सर्वे सहोदराः समं भजेरन् सनाभयो भगिन्यश्च समं भजेरन्निति सम्बन्धः। न पुनः सहोदरा भगिन्यश्च संभूय भजेरन्निति इतरेतरयोगस्य द्वन्द्वैकशेषाभावादप्रतीतेः। विभाग(२)कर्तृत्वान्वयेनापि चशब्दोपपत्तेः। यथा देवदत्तः कृषिं कुर्याद्यज्ञदत्तश्चेति। समग्रहणमुद्धारविभागनिवृत्त्यर्थम्। सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थम्। अनपत्यहीनजातिस्त्रीधनं तु भिन्नोदराप्युत्तमजातीयसपत्नीदुहिता गृह्णाति। तदभावे तदपत्यम्। यथाह मनुः (९।१९८)—'स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्'॥ इति। ब्राह्मणीग्रहणमुत्तमजात्युप-

(१) स्ववर्गे भाग ग. स्वस्ववर्गेण घ। (२) कर्तृत्वेनान्वयेनापि घ।

लक्षणम् । अतश्चाऽनपत्यवैश्याधनं क्षत्रियाकन्या गृह्णाति । पुत्राणामभावे पौत्राः पितामहीधनहारिणः । 'रिक्थभाज ऋणं प्रतिकुर्युः' इति गौतमस्मरणात् । 'पुत्रपौत्रैर्ऋणं देयम्' इति पौत्राणामपि पितामह्यृ(१)णापाकरणेऽधिकारात् । पौत्राणामप्यभावे पूर्वोक्ता भर्त्रादयो वान्धवा धनहारिणः ॥ १४५ ॥

(वी० मि०) स्त्रीधनप्रसङ्गेन वाग्दत्तकन्याया असुरादिविवाहार्थं पित्रादिगृहीते धने व्यवस्थामाह—

दत्त्वा कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम् ॥
मृतायां दत्तमादद्यात् परिशोध्योभयव्ययम् ॥ १४६ ॥

कन्यां वाचा दत्वा हरन् तस्मै अप्रयच्छन् द्रव्यानुबन्धाद्यनुसारेण राज्ञा दण्ड्यः । व्ययं विवाहार्थं वरेण व्ययितं धनं सोदयं वृद्धिसहितं दद्यात् । वाग्दानकर्ता कन्याया दैवान्मरणे उभयोः स्वस्य कन्यापित्रादेश्च परिशोध्य स्वदत्तं वस्त्रालङ्कारहिरण्यादि वर आदद्यात्, न तु वृद्धिम् । परिशोधनाभिधानेन कन्यापितृव्ययितादतिरिच्यमानत्वाभावे वरेण न ग्राह्यमिति दर्शितम् । चकारेण व्ययदानदण्डयोः साहित्यमभिप्रैति ॥ १४६ ॥

(मिता०) स्त्रीधनप्रसङ्गेन वाग्दत्ताविषये किंचिदाह—

दत्त्वेति । कन्यां वाचा दत्त्वापहरन्द्रव्यानुबन्धाद्यनुसारेण राज्ञा दण्डनीयः । एतच्चापहारकारणाभावे । सति तु कारणे 'दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत्' इत्यपहाराभ्यनुज्ञानान्न दण्ड्यः । यच्च वाग्दाननिमित्तं वरेण स्वसम्बन्धिनां कन्यासम्बन्धिनां वोपचारार्थं धनं व्ययीकृतं तत्सर्वं सोदयं सवृद्धिकं कन्यादाता वराय दद्यात् ॥

(मिता०) अथ कथंचिद्वाग्दत्ता संस्कारात्प्राङ् म्रियते (२)तदा किं कर्तव्यमित्यत आह—

मृतायामिति । यदि वाग्दत्ता मृता तदा यत्पूर्वमङ्गुलीयकादि (३)शुल्कं वरेण दत्तं तद्वर आददीत । परिशोध्योभयव्ययम् उभयोरात्मनः कन्यादातुश्च यो व्ययस्तं परिशोध्य विगणय्यावशिष्टमाददीत । यत्तु कन्यायै मातामहादिभिर्दत्तं शिरोभूषणादिकं वा [४]क-

(१) पितामह्यृणापाकरणाधिकारात् ख. । (२) म्रियेत तदा ग. घ. ।
(३) शुल्कं वा वरेण ख. । (४) क्रमागतं ख. ।

मायातं तत्सहोदरा भ्रातरो गृह्णीयुः । 'रिक्थं मृतायाः कन्याया गृह्णीयुः सोदरास्तदभावे मातुस्तदभावे पितुः' इति बौधायनस्मरणात् १४६ ॥

(वी० मि०) मृतायाः स्त्रीधनहारी निरूपितः, प्राक् जीवन्त्या धनहारिणमाह—

दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ॥
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ॥ १४७ ॥

संप्रतिरोधके वन्दीकरणादौ । चकारेण भर्तुर्धनाभावे सतीति सर्वत्रान्वितं विशेषणं समुच्चिनोति । शेषं सुगमम् ॥ १४७ ॥

(मिता०) मृतप्रजास्त्रीधनं भर्तृगामीत्युक्तम् । इदानीं जीवन्त्याः सप्रजाया अपि स्त्रियाः धनग्रहणे क्वचिद्भर्तुरभ्यनुज्ञामाह—

दुर्भिक्ष इति । दुर्भिक्षे कुटुम्बभरणार्थे, धर्मकार्ये अवश्यकर्तव्ये, व्याधौ च, सं(१)प्रतिरोधके वन्दिग्रहणनिग्रहादौ द्रव्यान्तररहितः स्त्रीधनं गृह्णन् भर्ता न पुनर्दातुमर्हति । प्रकारान्तरे(२)णापहरन् दद्यात् । भर्तृव्यतिरेकेण जीवन्त्याः स्त्रिया धनं केनापि दायादेन न ग्रहीतव्यम् । (मनुः ८।२९)—'जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः । ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः' ॥ इति दण्डविधानात् । तथा (मनुः ९ २००)—'पत्यौ जीवति यः स्त्रीभिरलङ्कारो (३)धृतो भवेत् । न तं भजेरन् दायादा भजमानाः पतन्ति ते' ॥ इति दोषश्रवणाच्च ॥ १४७ ॥

(वी० मि०) आधिवेदनिकं स्त्रीधनं प्रागुक्तं विवृणोति—

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ॥
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम् ॥ १४८ ॥

अधिविन्ना कृतसापत्न्या या स्त्री तस्यै आधिवेदनिकं सपत्नीपरिणयननिमित्तं धनं परिणीयमानायै दीयमानेन धनेन सममदत्तस्त्रीधनायै दद्यात् । स्त्रीधने प्रागेव दत्ते तु परिणीयमानायै दीयमानस्य धनस्यार्धमधिविन्नायै देयत्वेन प्रकीर्तितम् ॥ १४८ ॥

(मिता०) आधिवेदनिकं स्त्रीधनमुक्तं तदाह—

अधिविन्नेति । यस्या उपरि विवाहः साधिविन्ना सा चासौ स्त्री चेत्यधिविन्नस्त्री तस्यै अधिविन्नस्त्रियै आधिवेदनिकमधिवेदनानिमित्तं

(१) संप्रतिरोधक इति व्याधिविशेषणं कार्यानुष्ठानबाधक इति च तदर्थ इत्याह वाचस्पतिः ।

(२) णापहृतं दद्यात् घ. । (३) धृतो भर्त्रादिना तस्यै दत्तः स तया धृत इत्यर्थः ।

धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै भर्त्रा(१)श्वशुरेण वा स्त्रीधनं न दत्तम् । दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्धं दद्यात् । अर्धशब्दश्चात्र समविभागवचनो न भवति । अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः ॥ १४८ ॥

(वी० मि०) एवं विभागमुक्त्वा तस्य सन्देहे निर्णायकानाह—

विभागनिन्हवे ज्ञातिबन्धुसाक्ष्याभिलेखितैः ॥
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ १४९ ॥

नाऽऽवयोर्विभागो जात इत्येवं विभागस्याऽपलापे ज्ञातिभिः पितृकुलप्रभवैः, बन्धुभिस्तद्भिन्नैः सम्बन्धिभिः साक्षिभिः प्रागुक्तलक्षणैः अभिमतार्थसाधकैर्लेखितैर्विभागपत्रैर्गृहैः क्षेत्रैश्च यौतकैः यौतकवदसाधारणीभूतैर्विभागस्य भावना पूर्वमुत्पादना प्राङ्विवाकादिना ज्ञेया निर्णेया । चकारेण—

पृथगायव्ययधनाः कुसीदं च परस्परम् ।
वणिक्पथं च ये दद्युर्विभक्तास्ते न संशयः ॥

इत्यादिनारदोक्तविभागलिङ्गानां दिव्यस्य च सङ्ग्रहः ॥ १४९ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने दायविभागप्रकरणम् ॥

(मिता०) एवं विभागमुक्त्वा इदानीं तत्सन्देहे निर्णयहेतूनाह—

विभागनिह्नव इति । विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृबन्धुभिर्मातृबन्धुभिः मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैर्लेख्येन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः । तथा यौ(२)तकैः पृथक्कृतैर्गृहक्षेत्रैश्च । पृथक्कृष्यादिकार्यप्रवर्तनं पृथक्पञ्चमहायज्ञादिधर्मानुष्ठानं च नारदेन विभागलिङ्गमुक्तम्—'वि(३)भागधर्मसन्देहे दायादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् ॥ भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्' ॥ इति । तथापराण्यपि विभागलिङ्गानि (४)तेनैवोक्तानि—'साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथंचन' ॥ इति ॥ १४९ ॥

इति रिक्थविभागप्रकरणम् ।

(१) श्वशुरेण भर्त्रा वा ख. । (२) यौतकैः पृथक्कृतैर्गृहक्षेत्रैरिति विशेषणविशेष्यभावः व्य. म. । (३) इदं पद्यं घ. पुस्तकेऽधिकं । (४) तेनैव नारदेन ।

(वी० मि०) अथ सीमाविवादे निर्णयमाह—

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ॥
गोपाः सीमाकृषाणाश्च सर्वे च वनगोचराः ॥ १५० ॥
नयेयुरेते सीमानं स्थूला(१)ङ्गारतुषद्रुमैः ॥
सेतुवल्मीकानिम्नास्थिचैत्याद्यैरुपलक्षितम् ॥ १५१ ॥

ग्रामादिद्वयसम्बन्धिनः सीम्नो मर्यादाविवादे सामन्तादय एते प्रागुक्ताः स्थूलाङ्गारादिभिरुपक्षितं चिन्हितं सीमानं नयेयुर्निश्चिनुयुः। सामन्तस्वरूपमाह कात्यायनः—

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम् ।
गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य च ॥

यः परिवृतो वेष्टयित्वा चतुर्दिक्षु स्थितो ग्रामः स ग्रामस्य सामन्तः । एवं क्षेत्रगृहयोरपीत्यर्थः । ग्रामादिपदेन तत्र स्थिता लोका उच्यन्ते । स्थविरो वृद्धाः । आदिपदेन मौलोद्धृतयोर्ग्रहणम् । वृद्धादिलक्षणं कात्यायनेनोक्तम्—

निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तद्गुणान्वितैः ।
वृद्धा वा यदि वाऽवृद्धास्ते तु वृद्धाः प्रकीर्तिताः ॥
ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरं गताः ।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्तिताः ॥
उपश्रवणसंभोगकार्याख्यानोपचिन्हिताः ।
उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः ॥

गोपा गोचारकाः, सीमाकृषाणाः सीमासन्निहितक्षेत्रकर्षकाः, सर्वे वनचारिणो व्याधाः शाकुनिकवनपालकादयः । चकाराभ्यां कैवर्तोञ्छवृत्तिप्रभृतीनां मूलखातकव्यालग्राहिप्रभृतीनां च समुच्चयः । तथा च मनुः—

व्याधान् शाकुनिकान् गोपान् कैवर्तान्मूलखातकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान् ॥

इति । स्थूलोऽङ्गारोऽग्नेरुच्छिष्टं काष्ठम् । स्थलाङ्गारेति क्वचित्पाठः, तदा स्थलमुन्नतो भूप्रदेश इति व्याख्येयम् । तुषा धान्यत्वचः, द्रुमाः प्लक्षादयः, सेतुर्बन्धः, वल्मीको मध्यदेशे दिवाउभींदु इति प्रसिद्धः उच्चप्रदेशः, निम्नं गर्तादि, अस्थि प्रसिद्धं, चैत्यो ग्रामोपलक्षकवृक्षः ।

(१) स्थलाङ्गारेति मुद्रितपुस्तके पाठः ।

आद्यपदेन शर्करादिसङ्ग्रहः । तदाह मनुः—

अश्मनोऽस्थीनि गोवालांस्तथा भस्म कपालिकाः ।
करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा ॥
यानि चैवंप्रकाराणि कालाद् भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमाया अप्रकाशानि कारयेत् ॥१५०-१५१॥

(मिता०) अधुना सीमाविवादनिर्णय उच्यते—

सीम्न इति, नयेयुरिति च । ग्रामद्वयसम्बन्धिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामान्तर्वर्तिक्षेत्रमर्यादाविवादे च सामन्तादयः स्थलाङ्गारादिभिः पूर्वोक्तैः सीमालक्षणैरुपलक्षितां चिह्नितां सीमां नयेयुर्निश्चिनुयुः । सीमा क्षेत्रादिमर्यादा । सा चतुर्विधा जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति । सा च यथासम्भवं पञ्चलक्षणा । तदुक्तं नारदेन—'ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता । राजशासननीता च सीमा पञ्चविधा स्मृता' ॥ इति । ध्वजिनी वृक्षादिलक्षिता, वृक्षादीनां प्रकाशत्वेन ध्वजतुल्यत्वात् । मत्स्यिनी सलिलवती, मत्स्यशब्दस्य स्वाधारजललक्षकत्वात् । नैधानी निखाततुषाङ्गारादिमती, तेषां निखातत्वेन निधानतुल्यत्वात् । भयवर्जिता अर्थिप्रत्यर्थिपरस्परसम्प्रतिपत्तिनिर्मिता । राजशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता । एवंभूतायां षोढा विवादः सम्भवति । यथाह कात्यायनः—'आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च । अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः' ॥ इति । तथा हि—ममात्र पञ्चनिवर्तनाया भूमेरधिका भूरस्तीति केनचिदुक्ते पञ्चनिवर्तनैव नाधिकेत्याधिक्ये विवादः । पञ्चनिवर्तना मदीया भूमिरित्युक्तेन ततो न्यूनैवेति न्यूनतायाम् । पञ्चनिवर्तनो ममांश इत्युक्ते अंश एव नास्तीत्यस्तिनास्तित्वविवादः सम्भवति । मदीया भूः प्रागविद्यमानभोगैव भुज्यते इत्युक्तेन सन्तता चिरन्तन्येव मे भुक्तिरित्यभोगभुक्तौ विवादः । इयं मर्यादेयं वेति सीमाविवाद इति षट्प्रकार एव विवादः सम्भवति । षट्प्रकारेऽपि भूविवादे श्रुत्यर्थाभ्यां सीमाया अपि निर्णीयमानत्वात्सीमानिर्णयप्रकरणे तस्यान्तर्भावः । समन्ताद्भवाः सामन्ताः । चतसृषु दिक्ष्वन(१)न्तरग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः । 'ग्रामो ग्रामस्य सामन्तः क्षेत्रं

(१) अनन्तरा ग्रामादयः घ. ।

क्षेत्रस्य कीर्तितम् । गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य हि' ॥ इति । यथा । सामन्तग्रहणं च तत्संसक्ताद्युपलक्षणार्थम् , उक्तं च कात्यायनेन–'संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः । संसक्तसक्तसंसक्ताः (१)पद्मकाराः प्रकीर्तिताः' ॥ इति । स्थविरा वृद्धाः । आदिग्रहणेन मौलोद्धृतयोर्ग्रहणम् । वृद्धादिलक्षणं च तेनैवोक्तम्—'निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तद्गुणान्वितैः । वृद्धा वा यदि वाऽवृद्धास्ते तु वृद्धाः प्रकीर्तिताः ॥ ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरं गताः । तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्तिताः ॥ उपश्रवणसम्भोगकार्याख्यानोपचिह्निताः । उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः' ॥ इति । गोपाः गोचारकाः । सीमाकृषाणाः मनुनोक्ताः (८।२६०) 'व्याधाञ्शाकुनिकान्गोपान् कैवर्तान्मूलखातकान् । व्यालग्रा(२)हानुञ्छवृत्तीनन्यांश्च वनगोचरान्' ॥ इति । स्थलमुन्नतो भूप्रदेशः । अङ्गारोऽग्नेरुच्छिष्टम् । तुषा धान्यत्वचः । द्रुमा न्यग्रोधादयः । सेतुर्जलप्रवाहबन्धः । चैत्यं पाषाणादिबन्धः । आदिशब्देन वेणुवालुकादीनां ग्रहणम् । एतानि च प्रकाशाप्रकाशभेदेन द्विप्रकाराणि । यथाह मनुः (८।२४६–२४८) 'सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् । शाल्मलीशालतालांश्च क्षीरिणश्चैव पादपान् ॥ गुल्मान्वेणूंश्च विविधाञ्शमीवल्लीस्थलानि च । शरान् (३)कुब्जकगुल्मांश्च यथा सीमा न नश्यति ॥ तडागान्युदपानानि वाप्यः प्रस्रवणानि च । सीमासन्धिषु कार्याणि देवतायतनानि च' ॥ इति प्रकाशरूपाणि । (मनुः ८।२४९ २५२)–'उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् । सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् ॥ अश्मनोऽस्थीनि गोवालांस्तुषान्भस्म कपालिकाः । करीषमिष्टकाङ्गारशर्करावालुकास्तथा ॥ यानि चैवंप्रकाराणि कालाद् भूमिर्न भक्षयेत् । तानि सन्धिषु सीमाया मप्रकाशानि कारयेत ॥ एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः' ॥ इति प्रच्छन्नलिङ्गानि । एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादि(४)प्रदर्शितैः सीमां प्रति विवदमानयोः सीमानिर्णयं कुर्याद्राजा ॥ १५०–१५१ ॥

(वी० मि०) यदा तूक्तचिह्नानि न सन्ति विद्यमानान्यपि वा लि

---

(१) पद्माकाराः ग० । (२) ग्राहांस्तूञ्छवृत्तीन् ग. ।
(३) कुब्जकगुल्मांश्च ग. घ. । (४) प्रकाशितैः घ.।

ङ्गलिङ्गतया सन्दिग्धानि तदा निर्णयोपायमाह—

सामान्ता वा समग्रामाश्चत्वारोऽष्टौ दशाऽपि वा ॥
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥१५२॥

सामन्ता उक्तलक्षणाः, समग्रामाः प्रत्यासन्नग्रामीणाश्चत्वारोऽष्टौ दश वा स्वयं निश्चितसीमानो रक्तमाल्यवस्त्रवन्तो मूर्धधृतक्षितिखण्डाः सन्तः सीमां नयेयुर्निश्चयेयुः । अपिवेत्यव्ययसमुदायो विकल्पार्थः । सामन्ता वेति वाकारेण साक्षिणोऽभिप्रैति । यदाह मनुः—

साक्षिप्रत्यय एवासीत्सीमावादविनिर्णये ।

इति । तथा—

साक्ष्यभावे च चत्वारो ग्रामाः सीमान्तवासिनः ।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ॥

कात्यायनः—

स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः ॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः ।
कर्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता ॥

तथा साक्षिणः प्रक्रम्य स एव—

तेषामभावे सामन्तमौलवृद्धोद्धृतादयः ।

मनुः—

शिरोभिस्ते गृहीतोर्वीं स्रग्विणो रक्तवाससः ।
सुकृतैः शापिताः स्वैः स्वैर्ब्रूयुस्ते तु समञ्जसम् ॥

एवमभिधानानन्तरं विपक्षं यावद्राजदैवकं सामन्तादीनां यदि न भवति तदा राज्ञा तत्कृता सीमा निश्चेतव्या ।

सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च ।
त्रिपक्षपक्षसप्ताहं राजदैवकमिष्यते ॥

इति कात्यायनवचनात् ॥ १५२ ॥

(मिता०) यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिङ्गालिङ्गतया सन्दिग्धानि तदा निर्णयोपायमाह—

सामन्ता इति । सामन्ताः पूर्वोक्तलक्षणाः । समग्रामाश्चत्वारोऽष्टौ दशापि वेत्येवं समसंख्याः प्रत्यासन्नग्रामीणाः । रक्तस्रग्विणो रक्ताम्बरधराः मूर्ध्न्यारोपितक्षितिखण्डाः सीमानं नयेयुः प्रदर्शयेयुः ।

सामन्ता वेति विकल्पाभिधानं स्मृत्यन्तरोक्तसाक्ष्यभिप्रायम् । यथाह मनुः (८।२५३)--'साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णये' इति । तत्र च साक्षिणां निर्णेतृत्वं मुख्यम् । तदभावे सामन्तानाम् । तदुक्तम् । (मनुः ८।२५८)--'साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ' ॥ इति । तदभावे तत्संसक्तादीनां निर्णेतृत्वम् । यथाह कात्यायनः-'स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् । तत्संसक्तैस्तु (१)कर्तव्य उद्धारो नात्र संशयः ॥ संसक्तस(२)क्तदोषे तु तत्संसक्ताः प्रकीर्तिताः । कर्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता' ॥ इति । सामन्ताद्यभावे मौलादयो ग्राह्याः । 'तेषामभावे सामन्तमौलवृद्धोद्धृतादयः । स्थावरे षट्प्रकारेऽपि कार्या नात्र विचारणा' ॥ इति कात्यायनेन क्रमविधा(३)नात् । एते च सामन्तादयः संख्यागुणातिरेकेण सम्भवन्ति । 'सामन्ताः साधनं पूर्वं निर्दोषाः स्युर्गुणान्विताः । द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः' ॥ इति स्मरणात् । ते च साक्षिणः सामन्तादयश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः । (मनुः ८।२५६)—'शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः । सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समंजसम्' ॥ इति स्मरणात् । नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य । 'एकश्चेदुन्नयेत्सीमां सोपवासः समुन्नयेत् । रक्तमाल्याम्बरधरो भूमिमादाय मूर्धनि' ॥ इति नारदेनैकस्याभ्यनुज्ञानात् । योऽयं-'नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि । गुरुत्वादस्य कार्यस्य क्रियैषां बहुषु स्थिता:' ॥ इत्येकस्य निषेधः स उभयानुमतधर्मविद्व्यतिरिक्तविषय इत्यविरोधः । स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञाने उपायविशेषो नारदेनोक्तः—'निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु । तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनात्' ॥ इति । निम्नगया नद्या अपहृतेनापहरणेनोत्सृष्टानि स्वस्थानात्प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्यादाभूमिषु तत्र तत्प्रदेशानुमानादुत्सृष्टनष्टचिह्नानां प्राचीनप्रदेशानुमानात् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमे भागे इत्येवंविधात्प्रमाणाद्वा प्रत्यर्थिसमक्षविप्रतिपन्नाया अस्मार्तकालोप(४)लक्षितभुक्तेर्वा निश्चिनुयुः । बृहस्पतिना चात्र विशेषो

(१) कुर्वीत घ. । (२) दोषेषु ग. । (३) क्रमाभिधानात् घ. । (४) पलक्षितैर्भुक्तेर्वा घ. ।

दर्शितः—'आगमं च प्रमाणं च भोगकालं च नाम च । भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिणः' ॥ इति । एते च (१)साक्षिसामन्तादयः शपथैः श्राविताः सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः । यथाह मनुः (८।२५४)—'ग्रामेयककुलानां तु समक्षं सीम्नि साक्षिणः । प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः' ॥ इति । तेच पृष्टाः साक्ष्यादयः ऐकमत्येन समस्ताः सीम्नि निर्णयं ब्रूयुः । तैर्निर्णीतां सी(२)मां तत्प्रदर्शितसकललिङ्गयुक्तां साक्ष्यादिनामान्वितां चाविस्मरणार्थं पत्रे समारोपयेत् । उक्तं च मनुना (८।२६१)—'ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयम् । निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः' ॥ इति । एतेषां साक्षिसामन्तप्रभृतीनां सीमाचङ्क्रमणदिनादारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं चेन्नोत्पद्यते तदा तत्प्रदर्शनात्सीमानिर्णयः । अयं च राजदैविकव्यसनावधिः कात्यायनेनोक्तः—'सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च । त्रिपक्षपक्षसप्ताहं दैवराजिकमिष्यते' ॥ इति ॥ १५२ ॥

(वी०मि०) यदा त्वमीषां त्रिपक्षाभ्यन्तरे रोगादिर्दृश्यते तदा तेषां दण्डः कार्य इत्याह—

अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥

अनृते तेषां मिथ्यावचने निमित्तभूते राज्ञा पृथक् प्रत्येकं मध्यमसाहसं पञ्चपणशतानि दण्ड्यास्ते सामन्तादयः ॥

(मिता०) यदा त्वमीषामुक्तसाक्ष्यवचसां त्रिपक्षाभ्यन्तरे रोगादि दृश्यते, अथवा प्रतिवादिनिर्दिष्टाभ्यधिकसंख्यागुणसाक्ष्यन्तरविरुद्धवचनता तदा ते मृषाभाषितया दण्डनीयास्तदाह—

अनृत इति । अनृते मि(३)थ्यावादने निमित्तभूते सति सर्वे, सामन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकेन पणपञ्चशतेन दण्डनीयाः । सामन्तविषयता चास्य (४)साक्षिमौलादीनां स्मृत्यन्तरे दण्डान्तरविधानादवगम्यते । यथाह मनुः (८।२५७)—'यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः । विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्' ॥ इति । नारदोऽपि-'अथ चेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये । सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम्' ॥ इति

(१) साक्षिण· सामन्तादयः घ. । (२) सीमानं ख. ।
(३) मिथ्यावदने ग. । (४) साक्ष्यमौलत्वादीनां घ. ।

सामन्तानां मध्यमसाहसं दण्डमभिधाय—'शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्माण । प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसम्' ॥ इति तत्संसक्तादिषु प्रथमं साहसमुक्तवान् । मौलादीनामपि तमेव दण्डमाह—'मौलवृद्धादयस्त्वन्ये दण्डगत्या पृथक् पृथक् । विनेयाः प्रथमेनैव साहसेनाऽनृते स्थिताः' ॥ इति । आदिशब्देन गोपशाकुनिकव्याधवनगोचराणां ग्रहणम् । यद्यपि शाकुनिकादीनां पापरतत्वाल्लिङ्गप्रदर्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शन एव मृषाभाषित्वसम्भवाद्दण्डविधानमुपपद्यत एव । अनृते तु पृथक् दण्ड्या इत्येतद्दण्डविधानमज्ञानविषयम । 'बहूनां तु गृहीतानां न सर्वे निर्णयं यदि । कुर्युर्भयाद्वा लोभाद्वा दण्ड्यास्तूत्तमसाहसम्'॥ इति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दण्डान्तरविधानात् । तथा साक्षिवचनभेदेऽप्ययमेव दण्डस्तेनैवोक्तः—'कीर्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम' इति । एवमज्ञानादिनाऽनृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः । 'अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत्' इत्युक्त्वा 'त्यक्त्वा दुष्टांस्तु सामन्तानन्यान्मौलादिभिः सह । संमिश्रय कारयेत्सीमामेवं धर्मविदो विदुः' ॥ इति निर्णयप्रकारस्तेनैवोक्तः ॥

अभावे ज्ञातृचिन्हानां राजा सीम्नः प्रवर्तिता ॥ १५३ ॥

(वी०मि०) यदि ज्ञातारश्चिह्नानि वा न सन्ति तदा राजा स्वेच्छानुसारेण सीम्नः प्रवर्तिता प्रवर्तयिता । अन्तर्भावितोऽत्र ण्यर्थः । यदाह नारदः—

यदा तु न स्युर्ज्ञातारः सीमायां न च लक्षणम ।
तदा राजा द्वयोः सीमां नयेद् दृष्ट्वा च तत्स्वयम् ॥

मिताक्षरायां विवादास्पदीभूतभूमेः समविभागेन राज्ञा सीमां प्रवर्तयेदिति व्याख्यातम् । बृहस्पतिः—

अन्यग्रामात्समाहृत्य दत्ताऽन्यस्य यदा मही ।
महानद्याऽथवा राज्ञा कथं तत्र विचारणा ॥
नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही ।
अन्यथा न भवेल्लाभो नराणां राजदैवतः ॥
क्षयोदयौ जीवनं च दैवराजवशान्नृणाम् ।
तस्मात्सर्वेषु कार्येषु तत्कृतं न विचालयेत् ॥

ग्रामयोरुभयोर्यत्र मर्यादा कल्पिता नदी ।
क्षयोदये न चाल्पासौ चालयन् दण्डमर्हति ॥
एकत्र कूलपातं तु भूमेरन्यत्र संस्थितिम् ।
नदीतीरे प्रकुरुते तस्य तां न विचालयेत् ॥

कूलपातक्रमे या भूः सोत्तरं स्वामिन इत्यर्थः ।

क्षेत्रं समस्तमुल्लङ्घ्य भूमिः स्वस्था यदा भवेत् ।
तदा स्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम् ॥

क्षेत्रोल्लङ्घनेन नदीसञ्चारे लङ्घिता भूः पूर्वस्वामिन एव तिष्ठतीत्यर्थः ॥ १५३ ॥

(मिता०) यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथं निर्णय इत्यत आह—

अभाव इति । ज्ञातॄणां सामन्तादीनां लिङ्गादीनां च वृक्षादीनामभावे राजैव सीम्नः प्रवर्तिता प्रवर्तयिता । अन्तर्भावितोऽत्र ण्यर्थः । ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्य अस्येयं भूरस्येयमित्युभयोः समर्प्य तन्मध्ये सीमालिङ्गानि कुर्यात् । यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया । यथाह मनुः (८।२६५)—'सीमायामविषह्यायां स्वयं राजैव धर्मवित् । प्रदिशेद् भूमिमेकेषामुपकारादिति स्थितिः' ॥ इति ॥ १५३ ॥

(वी०मि०) ग्रन्थलाघवार्थमुक्तविधिमन्यत्राऽतिदिशति—

आरामायतनग्रामनिपानोद्यानवेश्मसु ॥
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ॥ १५४ ॥

आराम उपवनं, आयतनं पलालकूटादिस्थापनार्थं विभक्तो भूप्रदेशः, ग्रामो नगरादेरप्युपलक्षकः, निपानं कूपवाप्यादि, उद्यानं क्रीडार्थभूप्रदेशः, वेश्म गृहं, वर्षाम्बुप्रवाहः वर्षणजलसमुद्भूतप्रणाली, एषु एष एव सीमायामुक्त एव विधिर्निश्चयप्रकारः । आदिपदेन क्षेत्रद्वारादिसङ्ग्रहः । अत्र बृहस्पतिः—

निवेशकालादारभ्य गृहवार्यापणादिकम् ।
येन यावद्यथा भुक्तं तस्य तन्न विचालयेत् ॥
वातायनाः प्रणाल्यश्च तथा निर्व्यूहवेदिका ।
चतुःशाले स्यन्दनिकाः प्राङ्निविष्टा न चालयेत् ॥

प्रणाली जलमार्गः, निर्य्यूहवेदिका नागदन्तवेदिका, चतुःशालं चतुर्द्वारं गृहं, स्यन्दनिका पटलप्रान्तः ओसारीति प्रसिद्धा। कात्यायनः—

वृष्टिपातं प्रणालं च न कुर्यात्परवेश्मनि ।

बृहस्पतिः—

वर्चःस्थानं ब्रम्हचर्यं गर्तो विष्ठानुसेवनम् ।
अत्यारात्परकुड्यस्य न कर्तव्यं कदाचन ॥

तथा—

यान्त्यायान्ति जना येन पशवश्चाभिवारिताः ।
तदुच्यते संसरणं न रोद्धव्यं तु केनचित् ॥

कात्यायनः—

विण्मूत्रोदकचक्रं च वन्हिश्वभ्रे निवेशयेत् ।
अरत्निद्वयमुत्सृज्य परकुड्यां निवेशयेत् ॥

चक्रं तैलादियन्त्रम् । तथा—

सीमामध्ये तु जातानां वृक्षाणां सेवयोर्द्वयोः ।
फलं पुष्पं च संजातं क्षेत्रस्वामिषु निर्दिशेत ॥

द्वयोः क्षेत्रयोः स्वामिषु ।

अन्यक्षेत्रेषु जातानां शाखा यत्राऽन्यसंस्थिताः ।
स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थिताः ॥

शाखा इति शेषः ॥ १५४ ॥

(मिता०) असत्यामप्यतद्भावाशङ्कायामस्याः स्मृतेर्न्यायमूलतां दर्शयितुमतिदेशमाह—

आरामेति । आरामः पुष्पफलोपचयहेतुर्भूभागः । आयतनं निवेशनं (१)पलालकूटाद्यर्थं विभक्तो भूप्रदेशः । ग्रामः प्रसिद्धः । ग्रामग्रहणं च नगराद्युपलक्षणार्थम् । निपानं पानीयस्थानं वापीकूपप्रभृतिकम् । उद्यानं क्रीडावनम् । वेश्म गृहम् । एतेष्वारामादिष्वयमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः । तथा प्रवर्षणोद्भूतजलप्रवाहेषु अनयोर्गृहयोर्मध्येन जलौघः प्रवहति अनयोर्वेत्येवंप्रकारे विवादे आदिग्रहणात्प्रासादादिष्वपि प्राचीन एव विधिर्वेदितव्यः । तथा च कात्यायनः—'क्षेत्रकूपतडागानां केदारारामयोरपि । गृहप्रासादावसथनृपदेवगृहेषु च' ॥ इति ॥ १५४ ॥

---

(१) पलालादिकुटाद्यर्थं घ. ।

(वी०मि०) सीमाप्रसङ्गेन तदतिक्रमे दण्डमभिदधानस्तमेव दण्डमन्यत्रापि ग्रन्थलाघवार्थमाह—

मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा ॥
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः ॥ १५५ ॥

क्षेत्रादिव्यवच्छेदिका साधारणी भूर्मर्यादा तस्याः प्रकर्षेण भेदने सीमाया अतिक्रमणे तद्बहिः कर्षणादौ क्षेत्रस्य परकीयस्य भयादिप्रदर्शनेन हरणे च यथाक्रममधमोत्तममध्यमसाहसा दण्डाः कार्याः। तथापदेन क्षेत्रस्येत्यत्रान्वितेन गृहारामादिसङ्ग्रहः। तुशब्देनाऽनुलक्ष्यभेदनव्यवच्छेदः॥ १५५ ॥

(मिता०) सीमानिर्णयमुक्त्वा तत्प्रसङ्गेन मर्यादाप्रभेदनादौ दण्डमाह—

मर्यादाया इति। अनेकक्षेत्रव्यवच्छेदिका (१)साधारणा भूर्मर्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमा(२)मतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेण अधमोत्तममध्यमसाहसा दण्डा वेदितव्याः। क्षेत्रग्रहणं चात्र गृहारामाद्युपलक्षणार्थम्। यदा पुनः स्वीयभ्रान्त्या क्षेत्रादिकमपहरति तदा द्विशतो दमो वेदितव्यः। यथाह मनुः (८।२६४)—'गृहं तडागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानाद् द्विशतो दमः' ॥ इति। अपह्रियमाणक्षेत्रादिभूयस्त्वपर्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अत एवाह—'वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः' ॥ इति ॥ १५५ ॥

(वी० मि०) क्षेत्रस्य हरणे दण्ड इत्युक्तमपवदति—

न निषेधोऽल्पबाधस्तु सेतुः कल्याणकारकः ॥
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥ १५६ ॥

यदि क्षेत्रस्वामिनोऽल्पा बाधा पीडा यतस्तादृशः सेतुर्बन्धः कल्याणस्य परकीयस्य बहूपकारस्य कारकः स्यात्तदा क्षेत्रस्वामिना तत्र सेतुकर्ता न निषेध्यः न निवारणीयः। परभूमिं हरन्नपीत्युभयत्राऽन्वितम्। स्वल्पक्षेत्रस्य बहूदककूपो न निषेध्यः। तुशब्देन सम्पूर्णक्षेत्रदूषकतया बहुबाधस्य सेतोर्व्यवच्छेदः॥ १५६ ॥

---

(१) साधारणी ग.। (२) सीमामनतिलङ्घ्य ख.।

(मिता०) यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनयाऽर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तन्निषेधतः क्षेत्रस्वामिन एव दण्ड इत्याह—

न निषेध्य इति । परकीयां भूमिमपहरन्नाशयन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः स चेदीषत्पीडाकरो बहूपकारकश्च भवति । कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन (१)कल्याणकारकश्चातो बहूदको नैव निवारणीयः । कूपग्रहणं च वापीपुष्करिण्याद्युपलक्षणार्थम् । यदा पुनरसौ स(२)र्वक्षेत्रवर्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्तितया चाल्पोपकारकस्तदासौ निषेध्य इत्यर्थादुक्तं भवति । सेतोश्च द्वैविध्यमुक्तं नारदेन—'सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च । तोयप्रवर्तनात्खेयो बन्ध्यः स्यात्तन्निवर्तनात्' ॥ इति । यदा त्वन्यनिर्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्वस्वामिनं तद्वंश्यं नृपं वा पृष्ट्वैव संस्कुर्यात् । यथाह नारदः—'पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः । सेतुं प्रवर्तयेत्कश्चिन्न स तत्फलभाग्भवेत् ॥ मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे । राजानमामन्त्र्य ततः कुर्यात्सेतुप्रवर्तनम्' इति ॥ १५६ ॥

(वी०मि०) परक्षेत्रे सेतुं कूपं वा चिकीर्षता प्रार्थनयाऽर्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वाऽनुज्ञाप्य स कार्य इत्यभिप्रेत्याह—

स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत् ॥
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ॥ १५७ ॥

तदुत्पन्ने फले सस्यवृद्ध्यतिशये क्षेत्रस्वामिनो भोगो न तु कर्तुः । यदि तु स्वामी नास्ति तदा महीपतेस्तत्फलभोगः । एवकारः स्वामिन इत्यत्रान्वेति, तेन सेतुकर्तुर्व्यवच्छेदः ॥ १५७ ॥

(मिता०) क्षेत्रस्वामिनं प्रत्युपदिष्टम् । इदानीं सेतोः प्रवर्तयितारं प्रत्याह—

स्वामिने इति । क्षेत्रस्वामिनमनभ्यु(३)पगम्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्तयत्यसौ फलभाङ् न भवत्यपितु तदुत्पन्ने फले क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः । तस्मात्प्रार्थनया अर्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वानुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्तनीय इति तात्पर्यार्थः ॥ १५७ ॥

---

(१) बहूपकारको नैव घ. । (२) समग्रक्षेत्र घ. । (३) भ्युपगमय्य घ. ।

(वी०मि०) क्षेत्रप्रसङ्गेनाह—

फालाहतमपि क्षेत्रं यो न कुर्यान्न(१) कारयेत् ॥

स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ १५८ ॥

अहमिदं क्षेत्रं कृषामीति क्षेत्रस्वामिनेऽङ्गीकृत्य फालाहतमीषद्धलेन विदारितमपि क्षेत्रं यः पश्चात् स्वयं न करोति न वा परद्वारा कारयति स कृष्टस्य क्षेत्रस्य यावदुचितं फलं सामन्तादिकल्पितं प्रदाप्यः । तच्च क्षेत्रं तस्मादाच्छिद्य अन्येन कर्षकेण कारयेत् ॥ १५८ ॥

इति श्रीसकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजाधिराजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुरामसूरिसूनुसकलविद्यापारावारपारीणधुरीणश्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाख्याने श्रीयाज्ञवल्क्यव्याख्याने सीमाविवादप्रकरणम् ॥

(मिता०) क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तम् । इदानीं तस्यैव प्रसक्तानुप्रसक्त्या कंचिद्विध्यन्तरमाह—

फालाहतमिति । यः पुनः क्षेत्रस्वामिपार्श्वे अहमिदं क्षेत्रं कृषामीत्यङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तच्च क्षेत्रं यद्यपि फालाहतं ईषद्धलेन विदारितं न सम्यग्बीजावापार्हं तथापि तस्याकृष्टस्य फलं यावत्तत्रोत्पत्त्यर्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः । तच्च क्षेत्रं पूर्वकर्षकादाच्छिद्यान्येन कारयेत् ॥ १५८ ॥

इति सीमाविवादप्रकरणम् ।

(वी०मि०) अथ स्वामिपालविवादप्रकरणमारभ्यते—

माषानष्टौ तु महिषी सस्यघातस्य कारिणी ॥

दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् ॥ १५९ ॥

महिषी अष्टौ माषान् दण्डनीया । सस्यनाशकारिणी गौस्तदर्धं माषचतुष्टयं दण्डनीया । अजाविकं तु छागो मेषश्च सस्यनाशकारी तदर्धं माषद्वयं दण्डनीयमिति विपरिणामेनाऽन्वयः । अत्र महिष्या-

(१) न कुर्याद्यो न कारयेत्—इति मु० पु० पाठः ।

दीनां धनशून्यत्वेन दण्डासम्भवात्तत्स्वामी तत्पालकोऽस्तु । माषश्चात्र राजतः प्रागभिहितो राजतद्वयपरिमितो ग्राह्यः ।

सौवर्णैर्माषकैः संख्यादण्डकर्मसु शस्यते ।
पशूनां सस्यचरणे माषैरन्यैस्तु राजतैः ॥

इति भाष्यकारवचनात् । एतच्चाऽज्ञानविषयम् । ज्ञानपूर्वे तु कात्यायनः–

दापयेत्पणपादं गां द्वौ पादौ महिषीं तथा ।
तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः ॥

पणः कार्षापणः । तस्य पादश्चतुर्थांशः । 'अजादेः पाददण्डनं रात्रौ भक्षणे द्रष्टव्य'मिति रत्नाकरः ।

माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा ।
तथाऽजाविकवत्सानां दण्डः स्यादर्धमाषिकः ॥

इति नारदवचनं तु प्ररोहयोग्यमूलावशेषभक्षणपरम् ॥ १५९ ॥

(मिता०) व्यवहारपदानां परस्परहेतु(१)हेतुमद्भावाभावात् 'तेषामाद्यमृणादानम्' इत्यादिपाठक्रमो न विवक्षित इति व्युत्क्रमेण स्वामिपालविवादोऽभिधीयते—

माषानिति । परसस्यविनाशकारिणी महिषी अष्टौ माषान् दण्डनीया । गौस्तदर्धं चतुरो माषान् । अजा मेषाश्च माषद्वयं दण्डनीयाः । महिष्यादीनां धनसम्बधाभावात्तत्स्वामी पुरुषो लक्ष्यते । माषश्चात्र ताम्रिकपणस्य विंशतितमो भागः । 'माषो विंशतिमो भागः पणस्य परिकीर्तितः' इति नारदस्मरणात् । एतच्चाज्ञानविषयम् । ज्ञानपूर्वे तु 'पणस्य पादौ द्वौ गां(२) तु द्विगुणं महिषीं तथा । तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः' ॥ इति स्मृत्यन्तरोक्तं द्रष्टव्यम् । यत्पुनर्नारदेनोक्तम्—'माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा । तथाजाविकवत्सानां दण्डः स्यादर्धमाषिकः' ॥ इति, तत्पुनः प्ररोहयोग्यमूलावशेषभक्षणविषयम् ॥ १५९ ॥

भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः ॥

(वी०मि०) परक्षेत्रे सस्यं भक्षयित्वा तृप्ता अनिवारितास्तत्रैव यद्युपविशन्ति महिष्यादयस्तदा पूर्वोक्तात् द्विगुणो दमो दण्डः कार्यः । सवत्सानां तु भक्षयित्वोपविष्टानां पूर्वोक्ताच्चतुर्गुणो दण्डः कार्यः

(१) हेतुमद्भावात् घ. । (२) गां तद्द्विगुणं घ. ।

वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः ।

इति वचनात् ॥ १६० ॥

(मिता०) अपराधातिशयेन क्वचिद्दण्डद्वैगुण्यमाह—

भक्षयित्वेति । यदि पशवः परक्षेत्रे सस्यं भक्षयित्वा तत्रैवानिवारिताः शेरते तदा यथोक्ताद्दण्डाद् द्विगुणो दण्डो वेदितव्यः । सवत्सानां पुनर्भक्षयित्वोपविष्टानां यथोक्तदण्डाच्चतुर्गुणो दण्डो वेदितव्यः । 'वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः' इति वचनात् ॥

समर्मेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् ॥ १६० ॥

(वी०मि०) विवीतं प्रचुरतृणं गवादिचरणस्थानं परेण रक्ष्यमाणम् । तत्र तृणभक्षकानामेषां महिष्यादीनां समं क्षेत्रं सस्यभक्षणतुल्यं दण्डनीयम् । खरश्च उष्ट्रश्च खरोष्ट्रं तन्महिषीसमं यादृशे सस्यघाते महिष्या यादृशो दण्डस्तादृशे तादृशो दण्डः खरोष्ट्रयोरपीत्यर्थः ॥ १६० ॥

(मिता०) क्षेत्रान्तरे पश्वन्तरे चातिदेशमाह—

सममिति । विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशः । तदुपघातेऽपीतरक्षेत्रदण्डेन समं दण्डमेषां महिष्यादीनां विद्यात् । खराश्च उष्ट्राश्च खरोष्ट्रं तन्महिषीसमम् । महिषी यत्र यादृशेन दण्डेन दण्ड्यते तत्र तादृशेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम् । सस्योपरोधकत्वेन खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दण्डस्य चापराधानुसारित्वात्खरोष्ट्रमिति समाहारो न विवक्षितः ॥१६०॥

(वी०मि०) सस्यघाते न केवलं दण्डनीयः, किन्तु क्षेत्रस्वामिने फलमपि दाप्य इत्याह—

यावत्सस्यं विनश्येत्तु क्षेत्री ता(१)वत्फलं लभेत् ॥

गोपस्ताड्यश्च गो(२)मी तु पूर्वोक्तं दण्डमर्हति ॥ १६१ ॥

यावत्सस्यं महिष्यादिभक्षणेन नश्येत्तावतः सस्यस्य समुचितं फलमुपचयं क्षेत्रस्वामी लभेत् महिष्यादिस्वामिसकाशादित्यर्थः । तुशब्देन विनष्टातिरिक्तस्य तत्क्षेत्रस्य सस्यफलं व्यवच्छिनत्ति । गोपस्तु ताड्य एव न तु क्षेत्रफलं दद्यात् । सस्यभक्षणजन्यक्षीरादेः

(१) तावत्स्यात्क्षेत्रिणः फलम् । इति मु०पु० पाठः ।

(२) गोपस्ताड्यस्तु गोस्वामी—इति क० ख० पु० पाठः ।

स्वामिनोपभोगादिति भावः । ताडनं च प्रागुक्तदण्डस्याप्युपलक्षकम् ।

या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत् ।
न तत्र गोमिनो दण्डः पालस्तं दण्डमर्हति ॥

इति वचनात् । गोमी गोस्वामी । उपलक्षणं चैतत्, महिष्यादिस्वामिनामपि पूर्वोक्तं दण्डमर्हति । तुशब्देन ताडनं व्यवच्छिनत्ति॥१६१॥

(मिता०) परस्यविनाशे गोस्वामिनो दण्ड उक्तः। इदानीं क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह—

यावदिति । सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थम् । यस्मिन्क्षेत्रे यावत्पलालधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलमेतावति क्षेत्र एतावद्भवतीति सामन्तैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः । गोपस्तु ताडनीय एव न फलं दापनीयः । गोपस्य च ताडनं पूर्वोक्तधनदण्डसहितमेव पालदोषेण सस्यनाशे द्रष्टव्यम् 'या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत् । न तत्र गोमि(१)नो दण्डः पालस्तं दण्डमर्हति' ॥ इति वचनात् । गोमी पुनः स्वापराधेन सस्यनाशे पूर्वोक्तं दण्डमेवार्हति न ताडनम् । फलदानं पुनः सर्वत्र गो(२)स्वामिन एव । तत्फलपुष्टमहिष्यादिक्षीरेणोपभागद्वारेण तत्क्षेत्रफलभागित्वात् । गवादिभक्षितावशिष्टं पलालादिकं गोमिनैव ग्रहीतव्यम् । मध्यस्थकल्पित(३)मूल्यदानेन क्रीतप्रायत्वात् । अत एव नारदः—'गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते । सामन्तानुमतं देयं धान्यं यत्तत्र वापितम् ॥ पलालं (४)गोमिने देयं धान्यं वै कर्षकस्य तु' । इति ॥ १६१ ॥

(वी०मि०) क्षेत्रविशेषे पशुविशेषे चाऽभिहितं दण्डादिकमपवदति—

पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते ॥
अकामतः कामचारे चौरवद्दण्डमर्हति ॥ १६२ ॥
महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः ॥
पाला येषां तु(५) ते मोच्या राजदैवपरिप्लुताः ॥ १६३ ॥

(१) गोमिनां दण्डः ख. । (२) गोमिन एव ग. । (३) मूल्यद्वारेण घ. ।
(४) गोमिना देयं ख. । (५) पालो येषां न ते—इति मु० पु० पाठः ।

मार्गे ग्रामविवीतानां समीपवर्तिस्वक्षेत्रे स्वामिनः पालस्य चानिच्छया गवादिभिर्भक्षितेऽपि दोषो गोस्वामिनः । पालस्य चाऽपराधो दण्डादिप्रयोजको न भवति । कामतो गवादीनां चारणे तु चारकश्चौर इव दण्डमर्हति । अयं च दोषाभावः क्षेत्रस्याऽनावृतत्वेऽल्पकालं तद्रक्षणे च द्रष्टव्यः ।

यत्राऽपरिवृतं धान्यं विहिंस्युः पशवो यदि ।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम् ॥

इति मनुवचनात् । 'पथि ग्रामविवीतान्ते न दोषोऽन्यवृते धान्यकाल'मिति विष्णुवचनाच्च । महोक्षो बीजसेक्ता वृषभः । उत्सृष्टपशवो वृषोत्सर्गादौ त्यक्ता वृषभवत्सरीप्रभृतयः । सूतिका प्रसवोत्तरमनिर्गतदशाहा । आगन्तुकाः स्वयूथभ्रष्टा देशान्तरादेवागताः । आदिना—

अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः ।

इत्यादिस्मृत्यन्तरोक्ताः । मोच्याः दण्डनीयाः । येषां गवादीनां पाला राजदैवकेन परिप्लुता अस्वाधीनत्वात् ते विमोच्याः । उत्सृष्टानां स्वामिविरहेण दण्डाप्रसक्त्या दृष्टान्तार्थं तदुपादानमित्युपगन्तव्यम् । तुशब्देनोक्तातिरिक्तानां मोच्यत्वव्यवच्छेदः ॥ १६२--१६३ ॥

(मिता०) क्षेत्रविशेषे अपवादमाह—

पथीति । पथि ग्रामसमीपवर्तिनि क्षेत्रे ग्रामविवीतसमीपवर्तिनि च क्षेत्रे अकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः । दोषाभावप्रतिपादनं च दण्डाभावार्थं विनष्टसस्यमूल्यदानप्रतिषेधार्थं च । कामचारे कामतश्चारणे चौरवत् चौरस्य यादृशो दण्डस्तादृशं दण्डमर्हति । एतच्चानावृतक्षेत्रविषयम् । (मनुः ८।२३८) 'यत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि । न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्'॥ इति दण्डाभावस्यानावृतक्षेत्रविषयत्वेन मनुनोक्तत्वात् । आवृते पुनर्मार्गादिक्षेत्रेऽपि दोषोऽस्त्येव । वृतिकरणं च तेनैवोक्तम् । (मनुः ८।२३९) 'वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत् । छिद्रं निवारयेत्सर्वं श्वसूकरमुखानुगम्' ॥ इति ॥ १६२ ॥

(मिता०) पशुविशेषेऽपि दण्डाभावमाह—

महोक्षेति । महांश्चासावुक्षा च महोक्षो वृषः सेक्ता । उत्सृष्टपशवः वृषोत्सर्गादिविधानेन देवतोद्देशेन वा त्यक्ताः । सूतिका प्रसूता अनि-

देशाहा । आगन्तुकः स्वयूथात्परिभ्रष्टो देशान्तरागतः । एते मोच्याः परसस्यभक्षणेऽपि न दण्ड्याः । येषां च पालो न विद्यते तेऽपि दैवराजपरिप्लुताः दैवराजोपहताः सस्यविनाशकारिणो न दण्ड्याः । आदिशब्दग्रहणाद्धस्त्यश्वादयो गृह्यन्ते । ते चोशनसोक्ताः–'अदण्ड्या हस्तिनो ह्यश्वाः प्रजापाला हि ते स्मृताः । (१)अदण्ड्यौ काणकुब्जौ च ये शश्वत्कृतलक्षणाः ॥ अदण्ड्यागन्तुकी गौश्च सूतिका वाभि(२)सारिणी । अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव च' ॥ इति । अत्रोत्सृष्टपशूनामस्वामिकत्वेन दण्ड्यत्वासंभवात् दृष्टान्तार्थमुपादानम् । यथोत्सृष्टपशवो न दण्ड्या एवं महोक्षादय इति ॥ १६३ ॥

(वी० मि०) कस्मिन्काले पशूनामपराधे स्वामी दण्ड्यः कस्मिंश्च पाल इत्यपेक्षायां रात्रिकालीनेऽपराधे स्वामी दिवातने पाल इत्युत्तरमभिसन्धाय पालमधिकृत्य प्राह—

यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तदा ॥
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥ १६४ ॥
पालदो(३)षाद्विनाशे तु पाले दण्डो विधीयते ॥
अर्धत्रयोदशपणः (४)स्वामिनो द्रव्यमेव च ॥ १६५ ॥

यथा व्रणादिरहिताः संख्याविशेषविशिष्टाश्च पशवः स्वामिना प्रातःकाले गोपेऽर्पितास्तथैव तान् गोपः सायं प्रत्यर्पयेत् । दिवा स्वप्रमादेन मृतान् मूल्यद्वारेण चोपहरणादिना नष्टानदर्शनं प्राप्तांश्च प्रदाप्यः, यदि स कृतवेतनः कल्पितवेतनः स्यात् । चौरादिहृतस्याप्यानयनाशक्यत्वे स्वामिने तन्मूल्यं द्रव्यमेव विधीयते देयतया व्यवस्थाप्यते । दोषान्मरणे चौरादिहरणे वा पशूनां पालस्य अर्धपणस्त्रयोदशः पणोऽर्धाधिकद्वादशपणमितो दण्डः स्वग्राह्यो राज्ञा विधीयते । आद्यचकारेण श्वभिन्ननिपातितादिसङ्ग्रहः । तुशब्देन व-

(१) अदण्ड्याः काणकूटाश्च वृषाश्च कृतलक्षणाः इति पाठः । कूटः एकशृंगः । कृतलक्षणः प्रतप्तायसेन कृतलाञ्छनः । (२) अभिसारिणी स्वयूथात्प्रच्युता पुनः स्वयूथगामिनी ।

(३) पालदोषविनाशे तु–इति मु० पु० पाठः ।

(४) अर्धत्रयोदशपण इति अर्धरहितत्रयोदशपणः सार्धद्वादशपण इति यावत् । 'तास्तृतीयपूर्वपदाः समानाधिकरणेन समस्यन्त उत्तरपदलोपश्च' इति वार्तिकादुत्तरपदलोपी कर्मधारयः । यत्तु विज्ञानेश्वरेणार्धाधिकत्रयोदशपणो दण्डः इति व्याख्यातं तत्र सार्धद्विमात्रादिषु अर्धत्रिमात्रादीति महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम् ।

लात्कारेण गृहीत्वा चौरव्याघ्रादिकं स्वामिने कथयितुः पालस्य दण्डादिकं व्यवच्छिनत्ति। तदाहतुर्मनुनारदौ—

विक्रम्य तु हृतं चौरैर्न पालो दातुमर्हति।
यदि देशे च काले च स्वामिनः स्वस्य शंसति॥

बृहस्पतिश्च—

अव्यायच्छन्नविक्रोशन् स्वामिने चाऽनिवेदयेत्।
बोढुमर्हति दोषं तं विनयं चैव राजनि॥

द्वितीयेन चकारेण दण्डसाहित्यार्थकेन तद्विकल्पशङ्कां व्युदस्यति॥ १६४—१६५॥

(मिता०) गोस्वामिन उक्तमिदानीं गोपं प्रत्युपदिश्यते—

यथार्पितानिति। गोस्वामिना प्रातःकाले गणयित्वा यथासमर्पिताः पशवस्तथैव सायंकाले गोपो गोस्वामिने पशून् विगणय्य प्रत्यर्पयेत्। प्रमादेन स्वापराधेन मृतान्नष्टांश्च पशून् कृतवेतनः कल्पितवेतनो गोपः स्वामिने दाप्यः। वेतनकल्पना च नारदेनोक्ता—'गवां शताद्वत्सतरी धेनुः स्याद्वि(१)शताभृतिः। प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनि'॥ इति। प्रमादनाशश्च मनुना स्पष्टीकृतः (८।२३२) 'नष्टं जग्धं च कृमिभिः श्वहतं विषमे मृतम्। हीनं पुरुषकारेण प्रदद्यात्पाल एव तु'॥ इति। प्रसह्य चौरै(२)रपहृतं न दाप्यः। यथाह मनुः (८।२३३)—'वि(३)क्रम्य तु हृतं चौरैर्न पालो दातुमर्हति। यदि देशे च काले च स्वामिनः स्वस्य शंसति'॥ इति। दै(४)वमृतानां पुनः कर्णादि प्रदर्शनीयम्। (८।२३४) 'कर्णौ चर्म च वालांश्च बस्तिं (५)स्नायुं च रोचनाम्। (६)पशुषु स्वामिनां दद्यान्मृतेष्वङ्गा(७)नि दर्शयन्'॥ इति मनुस्मरणात्॥ १६४॥

(मिता०) पालदोषेति। किं च पालदोषेणैव(८)पशुविनाशे अर्धाधिकत्रयोदशपणं दण्डं पालो दाप्यः। स्वामिनश्च द्रव्यं विनष्टपशुमूल्यं मध्यस्थकल्पितम्। दण्डपरिमाणार्थः श्लोकोऽन्यत्पूर्वोक्तमेव॥ १६५॥

(१) द्विशताद् भृतिः घ.।
(२) अपहृतान् ख.।
(३) विघुष्यत्विति पाठान्तरम्।
(४) दैवराजमृतानां ख.।
(५) स्नायूनि रोचनाम्।
(६) पशुस्वामिषु दद्यात्तु मृतेष्वङ्गानि घ.।
(७) अङ्कादि दर्शयेत् इति पाठः।
(८) दोषेण पशु घ.।

(वी० मि०) ननु क्षेत्रादिव्याप्ते देशे कथं गवां वृत्तिः सञ्चारणं वा स्यात् सर्वत्र दण्डसंभवादत आह—

ग्रामेच्छया गोप्रचारे भूमी राजवशेन वा ॥
द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरेत् ॥ १६६ ॥
धनुःशतं परीणाहो(१)ग्रामक्षेत्रान्तरं भवेत् ॥
द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतम् ॥ १६७ ॥

गोप्रचारो गवां चारणार्थोऽकृष्टो भूभागो ग्रामवासिजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा परिकल्पनीयः । द्विजश्च तृणकाष्ठपुष्पाणि सर्वतोदिशं परिगृहीतादपि भूभागात् स्ववत् स्वक्षेत्रादिवत् आहरेत् । एवं गवां वृत्तिमुपपाद्य सञ्चरणमुपपादयति धनुःशतमिति । चतुर्हस्तपरिमितं धनुः तच्छतपरिमितं परीणाहश्चतुर्दिक्षु त्याज्या भूमिः ग्रामक्षेत्रयोरन्तरं भवेत् । खर्वटो ग्रामादुत्कृष्टो नगरादधमः । तस्य धनुःशतद्वयं क्षेत्रान्तरं, नगरस्य च धनुःशतचतुष्टयं क्षेत्रान्तरं चतुर्दिक्षु त्याज्यं भवेत् । तथा च सञ्चारणावस्थानादौ गवादीनां स देश उपयुज्यते, अतो न तत्र दण्ड इति तात्पर्यम् ॥ १६६-१६७ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने स्वामिपालविवादप्रकरणम् ॥

(मिता०) गोप्रसङ्गात् गोप्रचारमाह—

ग्रामेच्छयेति । ग्रामेच्छया ग्राम्यजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा गोप्रचारः कर्तव्यः । गवादीनां (२)चरणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः । द्विजस्तृणेन्धनाद्यभावे गवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वतः स्ववदनिवारित आहरेत् । फलानि (३)त्वपवृतादेव । 'गोग्न्यर्थं तृणमेधांसि वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानाम्' इति गौतमस्मरणात् । एतच्च परिगृहीतविषयम् । अपरिगृहीते तु द्विजव्यतिरिक्तस्यापि परिग्रहादेव स्वत्वसिद्धेः । यथा तेनैवोक्तम्—'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु' इति । यत्पुनरुक्तम्—'तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् । अनापृच्छन्हि गृह्णानो

(१) ग्रामे क्षेत्रा०—इति मु० पु० पाठः ।
(२) प्रचारणार्थं ख. । (३) त्वपरीवृतादेव ख. ।

हस्तच्छेदनमर्हति' ॥ इति, तत् द्विजव्यतिरिक्तविषयमनापाद्विषयं वा गवादिव्यतिरिक्तविषयं वेति ॥ १६६ ॥

(मिता०) इदमपरं गवादीनां स्थानासनसौकर्यार्थमुच्यते—

धनुःशतमिति । ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितं परिणाहः । सर्वतोदि(१)शमनुप्तसस्यं कार्यम् । खर्वटस्य प्रचुरकण्टकसन्तानस्य ग्रामस्य द्वे शतं (२)परिणाहः । नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःशतपरिमितमन्तरं कार्यम् ॥ १६७ ॥

इति स्वामिपालविवादप्रकरणम् ।

(वी० मि०) अथाऽस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते—

स्वं लभेताऽन्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते ॥
हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः ॥ १६८ ॥
नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरः ॥
देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत् ॥ १६९ ॥
विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ॥
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ॥ १७० ॥
आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ॥
पञ्चबन्धो दमस्तत्र(३) राज्ञा तेनाविभाविते ॥ १७१ ॥

स्वात्मीयं द्रव्यं अन्येनाऽस्वामिना विक्रीतं क्रेतुः सकाशात् स्वामी लभते । अस्वामिकृतविक्रयस्य क्रेतृस्वत्वाप्रयोजकत्वात् । क्रेतुश्चाऽप्रकाशेन कृते क्रये दोषो दण्डप्रयोजको भवति । प्रकाशक्रये तु न दण्डः ।

अथ मूलमनाहार्यं प्रकाशक्रयशोधितम् ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥

इति मनुवचनात् । तथा हीनादसंभाव्यमानतद्द्रव्यस्वामित्वाभावात् । तथा रह एकान्ते हीनमूल्ये चाल्पतरमूल्यार्पणके क्रये क्रेता तस्करः चौरवद्दण्ड्यः । चकारेण दासादिविक्रीतसमुच्चयः । त-

(१) दिक्ष्वनुप्तसस्यं घ. । (२) परीणाहः ख. ।
(३) दमस्तस्य राज्ञे-इति मु० पु० पाठः ।

दाह नारदः—

अस्वाम्यनुमताद्दासादसतश्च जनाद्गृहः ।
हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग् भवेत् ॥

नष्टस्वामिनोऽपह्नमस्वामिना द्रव्यमासाद्य क्रयेण प्राप्य क्रेता स्वामिनाभियुक्तो हर्तारं नरं राजपुरुषादिना ग्राहयेत् । तदाह नारदः—

न क्रयेदागमं क्रेता शुद्धिरस्य तदागमात् ।
विपर्यये तुल्यदोषः सर्वं तद्दण्डमर्हति ॥

विपर्यये मूलनिगूहने देशकालवशेनाऽतिपत्तौ राजपुरुषाद्यसंन्निधाने तु स्वयमेव क्रेता स्वाम्यभियुक्तो विक्रेतारं स्वामिनेऽर्पयेत् । अत्र हेतुः—विक्रेतुर्दर्शनात् स्वामिने प्रदर्शनात् क्रेतुः शुद्धिर्दण्डप्रयोजकापराधविरहः स्यात् । चस्त्वर्थः । एवं विक्रयी तद्द्रव्यस्य । यतस्तस्मात् क्रेतृदर्शितात् स्वामी द्रव्यं क्रयविपयीभूतं क्रेता च तन्मूल्यं राजा चाऽपराधानुसारेण दण्डमवाप्नोतीत्यर्थः । अवाप्नोतीत्युक्तं, तत्र स्वत्वं यदि स्वामिना साध्यते तदैवमित्याह आगमेनेति । नष्टद्रव्यं आगमेन प्रतिग्रहादिना उपभोगेन च, अतोऽन्यथा प्राणान्तरे वा नाष्टिकेन भाव्यं स्वस्वत्ववत्त्वेन साधनीयम् । तेन नाष्टिकेन स्वत्वे तत्राऽविभाविते तु पञ्चबन्धः पञ्चमांशो दमो राज्ञा ग्राह्यः । पञ्चमांश इति क्वचित्पाठः । राज्ञे इति चतुर्थ्यन्तपाठे तु देय इति शेपः । अत्रेदं पर्यवसितम्—अस्वामिविक्रीतं द्रव्यं स्वामिना तदानीं विद्यमानं स्वत्वं साधनीयं, क्रेत्रा च प्रकाशक्रयो राजदण्डाभावार्थं बोधनीयः । स्वामिने च विक्रेता प्रदर्शनीयस्तत्सकाशात् स्वयं मूल्यं गृहीत्वा स्वामिने क्रय्यं वस्तु राज्ञे दण्डं च दापयेत् । तस्याऽऽनयनाशक्यत्वे तु न द्रव्यं स्वामिने सर्वमर्धं वा दद्यात् । अप्रकाशक्रये तु दण्डमपि राज्ञे दद्यादिति । तदाह कात्यायनः—

नाष्टिकस्तु प्रकुर्वीत तद्धनं ज्ञातृभिः स्वकम् ।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनी ॥

बृहस्पतिः—

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
अविज्ञाताश्रयात् क्रीतं विक्रेता यत्र वा मृतः ॥

स्वामी दत्त्वार्धमूल्यं तु प्रगृह्णीयात् स्वकं धनम् ।

अथ मूलमनाहार्यमित्याद्युक्तम्, अनुवाक्यं तु विक्रेतुर्विदेशे विद्यमानत्वे सतीत्यविरोधः ॥ १६८—१७१ ॥

(मिता०) संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते । तस्य च लक्षणं नारदेनोक्तम्—'निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा । विक्रीयते समक्षं यत्स ज्ञेयोऽस्वामिविक्रयः' ॥ इति, तत्र किमित्याह—

स्वमिति । स्वमात्मसम्बन्धि द्रव्यं अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात् । अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात् । विक्रीतग्रहणं दत्ताहितयोरुपलक्षणार्थम् । (१)अस्वामिविक्रीतत्वेन तुल्यत्वात् । अत एवोक्तम्—'अस्वामिविक्रयं दानमाधिं च विनिवर्तयेत्' इति । क्रेतुः पुनरप्रकाशिते गोपिते (२)क्रय्ये दोषो भवति । तथा हीनात्तत्तद्द्रव्यागमोपायहीनाद्रहसि चैकान्ते संभाव्यद्रव्यादपि हीनमूल्येनाल्पतरेण च मूल्येन क्रये वेलाहीने वेलया हीनो वेलाहीनः क्रयो रात्र्यादौ कृतस्तत्र च क्रेता तस्करो भवति तस्करवद्दण्डादिभाग्भवतीत्यर्थः । यथोक्तम्—'द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात् । प्रकाशे क्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयात्' ॥ इति ॥ १६८ ॥

(मिता०) स्वाम्यभियुक्तेन क्रेत्रा किं कर्तव्यमित्यत आह—

नष्टेति । नष्टमपहृतं वान्यदीयं क्रयादिना प्राप्य हर्तारं विक्रे(३)तारं नरं ग्राहयेत् चौरोद्धरणकादिभिः आत्मविशुद्ध्यर्थं राजदण्डाप्राप्त्यर्थं च । अथाविदितदेशान्तरं गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य समर्पयेत्, तावतैवासौ शुद्धो भवतीति श्रीकराचार्येण व्याख्यातं तदिदमनुपपन्नम् । 'विक्रेतुर्दर्शनाच्छुद्धिः' इत्यनेन पौनरुक्त्यप्रसङ्गात् । अतोऽन्यथा व्याख्यायते नष्टापहृतमिति । नाष्टिकं प्रत्ययमुपदेशः । नष्टमपहृतं वात्मीयद्रव्यमासाद्य क्रेतुर्हस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत् । देशकालातिक्रमे स्थानपालाद्यसंनिधाने तद्वि(४)ज्ञापनकालात्प्राक् पलायनशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत् ॥ १६९ ॥

---

(१) अस्वामिक्रीतेन ख. । (२) क्रये घ. । (३) विक्रेतारं ग्राहयेत् ग. ।
(४) तद्विज्ञापकात्प्राक् घ. ।

(मिता०) ग्राहिते हर्तरि किं कर्तव्यमित्यत आह—

विक्रेतुरिति । यद्यसौ गृहीतः क्रेता न मयेदमपहृतमन्यसकाशात्क्रीतमिति वक्ति तदा तस्य क्रेतुर्विक्रेतुर्दर्शनमात्रेण शुद्धिर्भवति । न पुनरसावभियोज्यः । किं तु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः । यथाह बृहस्पतिः—'मूले समाहृते क्रेता नाभियोज्यः कथचन । मूलेन सह वादस्तु नाष्टिकस्य विधीयते' ॥ इति । तस्मिन् विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात्स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति । नृपश्चापराधानुरूपं दण्डं, क्रेता च मूल्यमवाप्नोति । अथासौ देशान्तरगतस्तदा योजनसंख्यया आनयनार्थं कालो देयः । 'प्रकाशं वा क्रयं कुर्यान्मूलं वापि समर्पयेत् । मूलानयनकालश्च देयस्तत्राध्वसंख्यया' ॥ इति स्मरणात् । अथाविज्ञातदेशतया मूलमाहर्तुं न शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति । 'असमाहार्यमूलस्तु क्रयमेव विशोधयेत्' इति वचनात् । यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलं च न प्रदर्शयति तदा स एव दण्डभाग्भवति—इति । 'अनुपस्थापयेन्मूलं क्रयं वाप्यविशोधयन् । यथाभियोगं धनिने धनं दाप्यो दमं च सः' ॥ इति मनुस्मरणात् ॥ १७० ॥

(मिता०) 'स्वं लभेतान्यविक्रीत'मित्युक्तं, तल्लिप्सुना किं कर्तव्यमित्यत आह—

आगमेनेति । आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि(१) भाव्ये साधनीयं तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः । अत्र चायं क्रमः—पूर्वस्वामी नष्टमात्मीयं साधयेत् । ततः क्रेता चौर्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत् । अथानेतुं न शक्नोति तदात्मदोषपरिहाराय क्रयं शो(२)धयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति ॥ १७१ ॥

(१) वेति भाष्यम् घ. ।
(२) साधयित्वा ग. ।

(वी०मि०) अस्वामिनो विक्रेतुस्तत्सकाशात् क्रेतुश्च प्रच्छादेन -स्वामिनो दण्डमाह—

हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् ॥
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥ १७२ ॥

दण्ड्यः । तुशब्देन निवेदने दण्डं व्यवच्छिनत्ति ॥ १७२ ॥

(मिता०) तस्करस्य प्रच्छादकं प्रत्याह—

हृतमिति । हृतं प्रनष्टं वा चौरादिहस्तस्थं द्रव्यं अनेन मदीयं द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णाति असौ षड्उत्तरा-न्नवतिं पणान्दण्डनीयः । तस्करप्रच्छादकत्वेन दुष्टत्वात् ॥ १७२ ॥

(वी०मि०) यदि प्रणष्टं वस्तु स्वामिना नानीयते किं तु राजपुरुषेण तदा व्यवस्थामाह—

शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ॥
अर्वाक् संवत्सरात् स्वामी हरेत परतो नृपः ॥ १७३ ॥
पणानेकशफे दद्याच्चतुरः पञ्च मानुषे ॥
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ॥ १७४ ॥

शुल्काधिकृतैः स्थानरक्षिभिर्वाहृतं नष्टापहृतं द्रव्यं, तद्राज्ञा संवत्सरपर्यन्तं रक्षणीयं, ततोऽर्वाक् स्वामी नाष्टिकः स्वतो विभाविते सति हरेत्प्राप्नुयात् । परतो वर्षादूर्ध्वमविभावितपरस्वत्व द्रव्यं नृपो हरेत् । प्रणष्टद्रव्यरक्षानिबन्धनां भृतिमाह—एकशफेऽश्वादौ नष्टे द्रव्ये चतुरः पणान् राज्ञे नाष्टिको दद्यात् । मानुषे च नष्टद्रव्ये पञ्च पणान् । महिषोष्ट्रगवां सम्बन्धिरूपेक्षणे द्वौ द्वौ प्रत्येकं, अजाविके छागे मेषे च प्रत्येकं पादं पादं दद्यात् पणस्य ।

प्रणष्टाधिगतं द्रव्यं राजा त्र्यब्दं निधापयेत् ।
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत् ॥

इति मनुवचनं तु श्रुतवृत्तसम्पन्नब्राह्मणविषयं, प्रकृतवचनं तु तद्भिन्नपरमित्यविरोधः ॥ १७३—१७४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने अस्वामिविक्रयप्रकरणम् ॥

(मिता०) राजपुरुषानीतं प्रत्याह—

शौल्किकैरिति । यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतं द्रव्यं राजपार्श्वे प्रत्यानीतं तदा संवत्सरादर्वाक्

प्राप्तश्चेत् नाष्टिकस्तद्द्रव्यमवाप्नुयात् । ऊर्ध्वं पुनः संवत्सराद्राजा गृह्णीयात् । स्वपुरुषानीतं च द्रव्यं जनसमूहेषूद्घोष्य यावत्संवत्सरं राज्ञा रक्षणीयम् । यथाह गौतमः—'प्रनष्टस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्यातं संवत्सरं राज्ञा रक्ष्यम्' इति । यत्पुनर्मनुना विध्यन्तरमुक्तम् (८।३०)—'प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् । अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत्' ॥ इति तच्छ्रुतवृत्तसंपन्नब्राह्मणविषयम् । रक्षणनिमित्तषड्भागादिग्रहणं च तेनैवोक्तम् (मनुः ८।३३)—'आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः । दशमं द्वादशं वापि सतां धर्ममनुस्मरन्' ॥ इति । तृतीयद्वितीयप्रथमसंवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः । प्रपञ्चितं चैतत्पुरस्तात् ॥१७३॥

(मिता०) मनूक्तषड्भागादिग्रहणस्य द्रव्यविशेषेऽपवादमाह—

पणानिति । एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तं चतुरः पणान्दद्यात् । मानुषे मनुष्यजातीये द्रव्ये पञ्च पणान् । महिषोष्ट्रगवां रक्षणनिमित्तं प्रत्येकं द्वौ द्वौ पणौ अजाविके पुनः प्रत्येकं पाद पादम् । दद्यादिति सर्वत्रानुषज्यते । अजाविकमिति समासनिर्देशेऽपि पादं पादमिति वीप्साबलात्प्रत्येकं सम्बन्धोऽवगम्यते ॥ १७४ ॥

इति अस्वामिविक्रयप्रकरणम् ।

(वी०मि०) सम्प्रति दत्ताप्रदानिकं व्यवहारपदम्-

अथ देयमदेयं च दत्तं चाऽदत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः ॥

इति नारदोक्तं निरूपयति—

स्वं कुटुम्बाऽविरोधेन देयं दारसुतादृते ॥
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥ १७५ ॥
प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः ॥
देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः ॥ १७६ ॥

स्वं आत्मीयं द्रव्यं भार्यापुत्रव्यतिरिक्तं कुटुम्बस्याऽवश्यभरणीयस्य भरणाविरोधेन देयं कुटुम्बभरणावशिष्टं देयमित्यर्थः । एवं देय-

मुक्त्वाऽदेयमाह अन्वये पुत्रपौत्रादिसन्ताने विद्यमाने सर्वस्वं न देयम्, अन्यस्मै यत्प्रतिश्रुतं दातुमङ्गीकृतं तत्तदतिरिक्ताय न देयम्। चकारेण ऋष्यन्तरोक्ताऽदेयसमुच्चयः । तथा च बृहस्पतिः—

सामान्यपुत्रदाराधिसर्वस्वन्यासयान्वितम् ।
प्रतिश्रुतं तथाऽन्यस्य न देयं त्वष्टधा स्मृतम् ॥

सामान्यमनेकस्वामिकं पुत्रदारयोश्च विमतयोरेवाऽदेयत्वम् ।

विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः ।
दाराः पुत्रास्तु सर्वस्वमात्मन्येव तु योजयेत् ॥
आपत्काले तु कर्तव्यं दानं विक्रय एव वा ।

इति कात्यायनवचनात् । अनुमतौ च विशेषमाह वसिष्ठः—'न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा, स हि सन्तानाय पूर्वेषां, न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः'। अन्यत्राऽनुज्ञानादिति दानमात्रेऽन्वितं, प्रतिग्रहे विद्यमानत्वेनाऽननुज्ञाने सत्यप्यभ्यधिकारात् । अत्र निषिद्धाचरणादधर्मो भवति, न तु दानासिद्धिरेव सर्वस्वदानादाविति स्मृतिसारः । दानं च विभजते बृहस्पतिः—

भृतिस्तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे ।
शुद्धानुग्रहसंप्रीत्या दत्तमष्टविधं स्मृतम् ॥

अदत्तमाह नारदः—

अदत्तं तु भयक्रोधकामशोकरुगन्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढास्वतंत्रार्तमतोन्मत्तापवर्जितैः ।
कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् ॥

आर्तेन धर्म्यार्थे दत्तं तु दत्तमेव ।

अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ।

इति कात्यायनवचनात् । बृहस्पतिः—

प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया ।
कार्ये वा धर्मसंयुक्ते स्वामी तत्पुनराप्नुयात् ॥

देयप्रसङ्गेन प्रतिग्रहस्य प्रकाशमेव कर्तव्यत्वमाह प्रतिग्रह इति । विवादवारणाय प्रकाशः प्रतिग्रहः कार्यः, स्थावरस्य तु विशेषतः प्रकाशमेव प्रतिग्रहः । सुवर्णादेरिव तस्याऽऽत्मनिष्ठत्वेन दर्शयितुमशक्यत्वात्। अथ प्रकृतमाह—धर्मार्थं प्रतिश्रुतं यत्तद्देयमेव, यद्यसौ सम्प्रदानभूतो

न धर्मच्युतो भवति । 'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्या'दिति गौतमवचनात् । न्यायेन दत्तं सप्तविधमुक्तं दत्त्वा पुनर्नैवाऽपहरेत् । चकारेण षोडशविधमदत्तमपहरेदिति वाक्यार्थः समुच्चीयते ॥ १७५-१७६ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने दत्ताप्रदानिकं प्रकरणम् ॥

(मिता०) अधुना विहिताविहितमार्गद्वयाश्रयतया द(१)त्तानपकर्म दत्ताप्रदानिकमिति च लब्धाभिधानद्वयं दानाख्यं व्यवहारपदमभिधीयते । तत्स्वरूपं च नारदेनोक्तम्—'दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति । दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्' ॥ इति । असम्यगविहितमार्गाश्रयेण द्रव्यं दत्त्वा पुनरादातुमिच्छति यस्मिन् वि(२)वादपदे तद्दत्ताप्रदानिकं दत्तस्याप्रदानं पुनर्हरणं यस्मिन्दानाख्ये तद्दत्ताप्रदानिकं नाम व्यवहारपदम् । विहितमार्गाश्रयत्वेन तत्प्रतिपक्षभूतं तदेव व्यवहारपदं दत्तान(१)पकर्मेत्यर्थादुक्तं भवति । दत्तस्यानपकर्म अपुनरादा(३)नाख्यं यत्र दानाख्ये विवादपदे तद्दत्तानपकर्म । तच्च देयादेयादिभेदेन चतुर्विधम् । यथाह नारदः—'अथ देयमदेयं च दत्तं वाऽदत्तमेव च । व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः' ॥ इति । यत्र देयमित्यनिषिद्धदानक्रियायोग्यमुच्यते । अदेयमस्वतया निषिद्धतया वा दानानर्हम् । यत्पुनः प्रकृतिस्थेन दत्तमव्यावर्तनीयं तद्दत्तमुच्यते । अदत्तं तु यत्प्रत्याहरणीयं तत्कथ्यते । तदेतत्संक्षेपतो निरूपयितुमाह—

स्वमिति । स्वमात्मीयं कुटुम्बाविरोधेन कुटुम्बानुपरोधेन कुटुम्बभरणावशिष्टमिति यावत् तद्द्यात् । तद्भरणस्यावश्यकत्वात् । यथाह मनुः (८।३५)—'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' ॥ इति । स्वं कुटुम्बाविरोधेनेत्यनेनादेयमेकविधं दर्शयति । स्वं दद्यादित्यनेन चास्वभूतानामन्वाहितयाचितकाधिसाधारणनिक्षेपाणां पञ्चानामप्यदेयत्वं व्यतिरेकतो दर्शितम् । यत्पुनर्नारदेनाष्टविधत्वमदेयानामुक्तम्—'अन्वाहितं याचितकमाधिः साधारणं च यत् । निक्षेपः पु(४)त्रदारांश्च सर्वस्वं चान्वये सति ॥ आपत्स्वपि हि कष्टासु वर्तमानेन देहिना । अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम्' ॥ इति । एतददेयत्वमा-

(१) दत्तानपाकर्म ख. । (२) व्यवहारपदे ग. । (३) रादानं ग. । (४) पुत्रदारंच ग. ।

त्राभिप्रायेण न पुनः स्वत्वाभावाभिप्रायेण । पुत्रदारसर्वस्वप्रतिश्रुतेषु स्वत्वस्य सद्भावात् । अन्वाहितादीनां स्वरूपं प्रागेव प्रपञ्चितम् ॥

(मिता०) स्वं दद्यादित्यनेन दारसुतादेरपि स्वत्वाविशेषेण देयत्वप्रसङ्गे प्रतिषेधमाह—

दारसुतादिति । दारसुताहृते दारसुतव्यतिरिक्तं स्वं दद्यान्न दारसुतमित्यर्थः । तथा पुत्रपौत्राद्यन्वये विद्यमाने सर्वं धनं न दद्यात् । 'पुत्रानुत्पाद्य संस्कृत्य वृत्तिं चैषां प्रकल्पयेत्' इति स्मरणात् । तथा हिरण्यादिकमन्यस्मै प्रतिश्रुतमन्यस्मै न देयम् ॥ १७५ ॥

(मिता०) एवं दारसुताव्यतिरिक्तं देयमुक्त्वा प्रसङ्गाद्देयधनग्रहणं च प्रतिगृहीत्रा प्रकाशमेव कर्तव्यमित्याह—

प्रतिग्रह इति । प्रतिग्रहणं प्रतिग्रहः सः प्रकाशः कर्तव्यो विवादनिराकरणार्थम् । स्थावरस्य च विशेषतः प्रकाशमेव ग्रहणं कार्यम् । तस्य सुवर्णादिवदात्मनि स्थितस्य दर्शयितुमशक्यत्वात् ॥

(मिता०) एवं प्रासङ्गिकमुक्त्वा प्रकृतमनुसरन्नाह—

देयमिति । देयं प्रतिश्रुतं चैव । यत् यस्मै धर्मार्थं प्रतिश्रुतं तत्तस्मै देयमेव यद्यसौ (१)धर्मात्प्रच्युतो न भवति । प्रच्युते न पुनर्दातव्यम् । 'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्' इति गौतमस्मरणात् । दत्त्वा नापहरेत्पुनः । न्यायमार्गेण यद्दत्तं तत्सप्तविधमपि पुनर्नापहर्तव्यम्, किं तु तथैवानुमन्तव्यम् । यत्पुनरन्यायेन दत्तं तददत्तं षोडशप्रकारमपि प्रत्याहर्तव्यमेवेत्यर्थादुक्तं भवति । नारदेन च— 'दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम्' इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम्—'पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः । स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः ॥ अदत्तं तु भयक्रोधशोकवेगरुगान्वितैः । तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥ बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम् । कर्ता ममेदं कर्मेति प्रतिलाभेच्छया च यत् ॥ अपात्रे पात्रमित्युक्ते कार्ये वा (२)धर्मसंहिते । यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतम्' ॥ इति । अयमर्थः—पण्यस्य क्रीतद्रव्यस्य यन्मूल्यं दत्तम्, भृतिर्वेतनं कृतकर्मणे दत्तम्, तुष्ट्या वन्दिचारणादिभ्यो दत्तम्, स्नेहाद् दुहितृपुत्रादिभ्यो दत्तम्, प्रत्युपकारतः (३)उपकृतवते प्रत्युपकाररूपेण दत्तम्, स्त्रीशुल्कं परिणय-

(१) धर्मप्रच्युतो घ. । (२) धर्मसंयुते ख. । (३) उपकृते घ. ।

नार्थं कन्याज्ञातिभ्यो यद्दत्तम्, यच्चानुग्रहार्थमदृष्टार्थं दत्तं तदेतत्सप्तविधमपि दत्तमेव न प्रत्याहरणीयम् । भयेन बन्दिग्राहादिभ्यो दत्तम्, क्रोधेन (१)पुत्रादिभ्यो वैरनिर्यातनायान्यस्मै दत्तम्, पुत्रवियोगादिनिमित्तशोकावेशेन दत्तम्, उत्कोचेन कार्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्, परिहासेनोपहासेन दत्तम् । (२)एकः स्वं द्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः । छलयोगतः शतदानमभिसंधाय सहस्रमिति परिभाष्य ददाति । बाले(३)नाप्राप्तषोडशवर्षेण । मूढेन लोक(४)वादानभिज्ञेन । अस्वतन्त्रेण पुत्रदासादिना । आर्तेन रोगाभिभूतेन । मत्तेन मदनीयमत्तेन । उन्मत्तेन वातिकाद्युन्मदग्रस्तेन वा अपवार्जितं दत्तम् । यथायं (५)मदीयमिदं कर्म करिष्यतीति प्रतिलाभेच्छया दत्तम्, अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तम्, यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोडशप्रकारमपि दत्तमदत्तमित्युच्यते । प्रत्याहरणीयत्वात् । आर्तदत्तस्यादत्तत्वं धर्मकार्यव्यतिरिक्तविषयम् । 'स्वस्थेनार्तेन वा दत्तं श्रावितं धर्मकारणात् । अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः' ॥ इति कात्यायनस्मरणात् । तथेदमपरं संक्षिप्तार्थं वचनं सर्वविवादसाधारणम् । (मनुः ८।१६८)—'योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यस्य वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्' ॥ इति । योग उपाधिः । येनागामिनोपाधिविशेषेणाधिविक्रयदानप्रतिग्रहाः कृतास्तदुपाधिवि(६)गमे तान् क्रयादीन्विनिवर्तयेदित्यस्यार्थः । यः पुनः षोडशप्रकारमपि अदत्तं गृह्णाति यश्चादेयं प्रयच्छति तयोर्दण्डो नारदेनोक्तः—'गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति । अदेयदायको दण्ड्यस्तथा दत्तप्रतीच्छकः' ॥ इति ॥ १७६ ॥

इति दत्ताप्रदानिकं नाम प्रकरणम् ।

(वी०मि०) अथ क्रीतानुशयाख्यं विवादास्पदम्—

क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतद्विवादपदमुच्यते ॥

---

(१) पुत्रादिर्वैर घ. । (२) एकोऽपि स्वं द्रव्य ख. । (३) अप्राप्तव्यवहारेण ग. ।
(४) लोकवेदा घ. । (५) मदीयंकर्म ख. । (६) धिगमे क्रयादीन् घ. ।

इति नारदेन लक्षितमुपक्रमते—

दशैकपञ्चसप्ताहं मासत्र्यहार्धमासिकम् ॥
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥ १७७ ॥

दशाहादिपर्यन्तं बीजादीनां परीक्षणं, तथा च तावत्समयमध्ये यदि क्रीते वस्तुनि अनुशयस्तदा परावर्तनीयं, न तु तदूर्ध्वमित्यर्थः। दशाहमेकादशाहं पञ्चाहं सप्ताहं मासं त्र्यहं अर्धमासं च बीजानामयसां वाह्यानामश्वादीनां रत्नानां स्त्रीणां दास्यादीनां दोह्यानां गवादीनां पुसां दासादीनां यथाक्रममन्वेति।

क्रीत्वा विक्रीय वा पण्यं यस्येहानुशयो भवेत्।
सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाऽऽददीत वा ॥
परेण तु दशाहस्य नाऽऽदद्यान्नैव दापयेत्।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥

इति मनुवचनं तु बीजपरमेव।

अविज्ञातं तु यत् क्रीतं दुष्टं पश्चाद्विभावितम्।
क्रीतं तत्स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥

इति कात्यायनवचनात्। काले परीक्षाकाले। अन्यथा तदूर्ध्वम्। इदं च सर्वमपरीक्ष्य क्रीते द्रष्टव्यम्, 'अविज्ञात'मिति कात्यायनेनाभिधानात्।

परीक्षेत स्वयं पण्यमन्येषां च प्रदर्शयेत्।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत् ॥

इति बृहस्पतिवचनात्। उक्तकालमध्येऽपि क्रीतद्रव्यपरावर्तने विशेषमाह नारदः—

क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाऽन्ह्यविक्षतम् ॥
द्वितीयेऽन्हि ददत् क्रेता मूल्यात्रिंशांशमाहरेत्।
द्विगुणं तु तृतीयेऽन्हि परतः क्रेतुरेव तत् ॥

परत इति दोह्यपरम्।

क्रीत्वा चाऽनुशयात्पण्यं त्यजेद्दोह्यादि यो नरः।
अदुष्टमेव काले तु स मूल्याद्दशमं वहेत् ॥

इति कात्यायनवचनं परीक्षणोत्तरावधिकालपरम्। द्वयमपि वेदं

क्रीतद्रव्यस्य क्रेतृवशीकृतत्वभावे । अन्यथा तु—

क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते ।
षड्भागं तत्र मूल्यस्य दत्त्वा क्रीतं त्यजेद् बुधः ॥

इति वचनाद्व्यवस्था ।

न सावद्यं न च न्यूनं न दूरे न तिरोहितम् ।

इति मनुवचनात् क्रयकाले ज्ञातदोषं तु वस्तु न परीक्षणकालमध्येऽपि परावर्तनीयम् ।

परिभुक्तं च यद्वासः क्लिष्टरूपं मलीमसम् ।
सदोषमपि तत् क्रीतं विक्रेतुर्न भवेत्ततः ॥

इति नारदवचनात् ॥ १७७ ॥

(मिता०) अथ क्रीतानुशयः कथ्यते । तत्स्वरूपं नारदेनोक्तम्—'क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते । क्रीतानुशय इत्येतद्विवादपदमुच्यते' ॥ इति । तत्र च यस्मिन्नहनि पण्यं क्रीतं तस्मिन्नेवाह्नि तदविकृतं प्रत्यर्पणीयमिति तेनैवोक्तम् । 'क्रीत्वा मूल्येन यत्पण्यं दुःक्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत्तस्मि(१)न्नेवाह्न्यविक्षतम' ॥ इति । द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः—'द्वितीयेह्नि ददत्क्रेता मूल्यात् त्रिंशांश(२)माहरेत् । द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ' ॥ इति । परतोऽनुशयो न कर्तव्य इत्यर्थः । एतच्च बीजातिरिक्तोपभोगादिविनश्वरवस्तुविषयम् ।

बीजादिक्रये पुनरन्य एव प्रत्यर्पणविधिरित्याह—

दशैकेति । बीजं व्रीह्यादिबीजम् । अयो लो(३)हम् । वाह्यो बलीवर्दादिः । रत्नं मुक्ताप्रवालादि । स्त्री दासी । दोह्यं (४)महिष्यादि । पुमान् दासः । एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः । परीक्ष्यमाणे च बीजादौ यद्यसम्यक्त्वबुद्ध्यानुशयो भवति तदा दशाहाद्यभ्यन्तर एव क्रयनिवृत्तिर्न पुनरूर्ध्वमित्युपदेशप्रयोजनम् । यत्तु मनुवचनम् (८।२२२)—'क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात्तद् द्रव्यं दद्याच्चैवाददीत च' ॥ इति, तदुक्तलोहादिव्यतिरिक्तो(५)पभोगाविनश्वरगृहक्षेत्रयानशयनासनादिविषयम् । सर्वं चैतदपरीक्षितक्रीतविषयम् । यत्पुनः [६]परीक्ष्य न पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रेत्रे न

(१) तस्मिन्नेवाह्नि वीक्षितमिति पाठः । (२) मावहेत् ख. । (३) लोहादि ख. ।
(४) माहिष्यादि ख. । (५) पभोगाविनश्वर ख. । (६) परीक्षित घ. ।

प्रत्यर्पणीयम् । तदुक्तम्—'क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः । परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः' ॥ इति ॥ १७७ ॥

(वी०मि०) वीजादिपरीक्षणप्रसङ्गेन स्वर्णादिपरीक्षणमाह—

अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते ॥
अष्टौ त्रपुणि सीसे च ताम्रे पञ्च दशाऽयसि ॥ १७८ ॥
शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके ॥
मध्ये पञ्चपला सौत्रे(१) सूक्ष्मे तु त्रिपला मता ॥ १७९ ॥
कार्मिके रोमवद्धे च त्रिंशद्भागः क्षयो मतः ॥
न क्षयो न च वृद्धिश्च कौशेये वाल्कलेषु च ॥ १८० ॥
देशं कालं च भोगं च ज्ञात्वा नष्टे वलावलम् ॥
द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम् ॥ १८१ ॥

सुवर्णमुत्तमं अग्नौ न क्षीणं भवति । रजते शते शतपलमिते द्विपलमग्नौ क्षीणं भवति । त्रपुणि रङ्गे सीसे च पलशते अष्टौ पलानि, ताम्रे पलशते पञ्च पलानि, अयसि पलशते दशपलानि अग्नौ क्षीयन्ते । चकारेण कांस्यस्य त्रपुताम्रयोनिकस्य तदंशानुसारेण क्षयः समुच्चीयते । ऊर्णैः कार्पासैर्वा सूत्रैः स्थूलैर्निर्मिते कम्बलपटादौ शतपलमिते दशपलमिता वृद्धिः । मध्येऽनतिसूक्ष्मे शतपलमिते पञ्चपला वृद्धिः । अतिसूक्ष्मसूत्रके तु तस्मिन् पलशतमिते त्रिपलमिता वृद्धिर्मता मण्डादिसम्बन्धादभिज्ञसंमता । यत्र निष्पन्ने पटादौ स्वस्तिचक्रादिकं सूच्या क्रियते तत्कार्मिकं, यत्र प्रावारादौ रोमाणि वध्यन्ते तद्रोमवद्धं, तत्र त्रिंशत्तमो भागः क्षयो मतः । कौशेये कृमिकोशोत्थे सूत्रनिर्मिते पट्टवस्त्रादौ वल्कलप्रभवेषु च न क्षयो न वा वृद्धिः । चकारैर्गोधूमादीनां बहूनामनुक्तानां पेषणादौ क्षयवृद्ध्योरभावः समुच्चीयते । अनुक्तविशेषेषु च शाणक्षौमादिषु द्रव्याणां मूलह्रासवृद्धिज्ञा देशं कालमुपभोगं नष्टद्रव्यस्य सारासारतां च ज्ञात्वा यद् ब्रूयुस्तदसंशयं दाप्यमिति । चकारेण ह्रासयोग्यस्थाने ह्रासनीयमिति समुच्चीयते ॥ १७८–१८१ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने क्रीतानुशयप्रकरणम् ।

(१) मध्ये पञ्चपला वृद्धिः—इति मु० पु० पाठः ।

(मिता०) दोह्यादिपरीक्षाप्रसङ्गेन स्वर्णादेरपि परीक्षामाह—

अग्नाविति । वह्नौ प्रताप्यमानं सुवर्णं न क्षीयते । अतः कटकादिनिर्माणार्थं यावत्स्वर्णकारहस्ते प्रक्षिप्तं तावत्तुलितं तैः प्रत्यर्पणीयम् । इतरथा क्षयं दाप्या दण्ड्याश्च । रजते तु शतपले प्रताप्यमाने पलद्वयं क्षीयते । अष्टौ त्रपुणि सीसे च । शते इत्यनुवर्तते । त्रपुणि सीसे च शतपले प्रताप्यमानेऽष्टौ पलानि क्षीयन्ते । ताम्रे पञ्च दशायसि-ताम्रे शतपले पञ्चपलानि, अयसि दशपलानि क्षीयन्ते । अत्रापि शत इत्येव । कांस्यस्य तु त्रपुताम्रयोनित्वात्त(१)दनुसारेण क्षयः कल्पनीयः । (२)ततोऽधिकक्षयकारिणः शिल्पिनो दण्ड्याः॥१७८॥

(मिता०) क्वचित्कम्बलादौ वृद्धिमाह—

शत इति । स्थूलेनौर्णसूत्रेण यत्कम्बलादिकं क्रियते तस्मिन् शतपले दशपला वृद्धिर्वेदितव्या । एवं कार्पाससूत्रनिर्मिते पटादौ वेदितव्यम् । मध्ये अनतिसूक्ष्मसूत्रनिर्मिते पटादौ पञ्चपला वृद्धिः । सुसूक्ष्मसूत्ररचितं शते त्रिपला वृद्धिर्वेदितव्या । एतच्चाप्रक्षालितवासोविषयम् ॥ १७९ ॥

(मिता०) द्रव्यान्तरे विशेषमाह—

कार्मिक इति । कार्मिकं कर्मणा चित्रेण निर्मितम् । यत्र निष्पन्ने पटे चक्रस्वस्तिकादिकं चि(३)त्रं सूत्रैः क्रियते तत्कार्मिकमित्युच्यते । यत्र प्रा(४)वारादौ रोमाणि बध्यन्ते स रोम(५)बद्धः । तत्र त्रिंशत्तमो भागः क्षयो वेदितव्यः । कौशेये कोशप्रभवे वाल्कलेषु वृक्षत्वङ्निर्मितेषु वसनेषु वृद्धिह्रासौ न स्तः, किन्तु (६)यावद्वयनार्थं कुविन्दादिभ्यो दत्तं तावदेव प्रत्यादेयम् ॥ १८० ॥

(मिता०) द्रव्यानन्त्यात्प्रतिद्रव्यं क्षयवृद्धिप्रतिपादनाशक्तेः सामान्येन ह्रासवृद्धिज्ञानोपायमाह—

देशमिति । शाणक्षौमादौ द्रव्ये नष्टे ह्रासमुपगते द्रव्याणां कुशलाः द्रव्यवृद्धिक्षयाभिज्ञाः देशं कालमुपपभोगं तथा नष्टद्रव्यस्य बलाबलं सारासारतां च परीक्ष्य यत्कल्पयन्ति तदसंशयं शिल्पिनो दाप्याः॥१८१॥

इति क्रीतानुशयप्रकरणम् ॥

---

(१) त्तदंशानुसारेण घ० । (२) इतोधिकं ख० । (३) चित्रैः सूत्रैः ख० ।
(४) प्रान्तादौ ग० । (५) रोमबन्धः घ० । (६) यावद्वानार्थं घ० ।

(वी०मि०) अथाऽभ्युपेत्याशुश्रूषानाम प्रकरणमारभते । तत्स्वरूपं तु नारदोक्तम्—

अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते ।
अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते ॥

इति । मनुना च वेतनाप्रदान एवास्य विवादपदस्य कयाचिद्विवक्षयाऽन्तर्भावमभिप्रेत्य पृथगनभिधानात् । शुश्रूषकश्च पञ्चविधः–शिष्योऽन्तेवासी भृतकोऽधिकर्मकृद्दासश्चेति । तत्र शुभं कर्म चतुर्णामशुभं कर्म दासस्य भवति ।

अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् ।
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ॥
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ।
इच्छतः स्वामिनश्चाऽङ्गैरुपस्थानमथाऽन्ततः ॥
अशुभं कर्म विज्ञेयं शुभमन्यदतः परम् ।

इति नारदवचनात् । तत्र शिष्यो वेदविद्यार्थी, अन्तेवासी शिल्पभिक्षार्थी, भृतको वेतनेन कर्मकर्ता, अधिकर्मकृत् कर्म कुर्वतामधिष्ठाता, दासश्च-

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतश्चैव आहितः स्वामिना च यः ॥
मोचि(१)तो महतश्चर्णाद्युद्धप्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥

इति नारदेनोक्तः । तत्र शिष्यस्य वृत्तिः—

आहूतश्चाप्यधीयीत लब्धं चाऽस्मै निवेदयेत् ।

इत्यादिना प्रागभिहिता । भृतकाऽधिकर्मकृतोस्तु वेतनादानप्रकरणे वक्ष्यते । दासान्तेवासिनोस्त्वत्राह—

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ॥
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि ॥ १८२ ॥
प्रव्रज्यावसितो राज्ञो दासस्त्वा(२)मरणान्तिकः ॥
वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ॥ १८३ ॥

(१) मोहितो—इति क०पु०पाठः । (२) दास आमरणान्तिकः—इति मु० पु० पाठः ।

बलात्कारेण दासीकृतः, चौरैर्विक्रीतश्च दासीकृतः, चकाराऽपिकाराभ्यां तेन दत्त आधीकृतश्च मुच्यते दासकर्मणः । यश्च चौरव्याघ्राद्याक्रान्तस्य स्वामिनः प्राणान् रक्षति स च मुच्यते । अपिकारेण दास्यमोक्षहेत्वन्तरसमुच्चयः । तदाह नारदः—

अनाकालभृतो दास्यान्मुच्यते गोद्वयं ददत् ।
सम्भक्षितं यद् दुर्भिक्षे न तच्छुध्येत कर्मणा ॥
भक्तस्योपेक्षणात्सद्यो भक्तदासः स मुच्यते ।
आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत् ॥
ऋणं तु सोदयं दत्त्वा ऋणी दास्यात्प्रमुच्यते ॥
तवाऽहमित्युपगतो युद्धप्राप्तः पणे जितः ।
प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा ॥
कृतकालव्यपगमात् कृतकोऽपि विमुच्यते ।
निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः ॥

तुल्यकर्मणा स्वकर्मतुल्यकर्मकरणेन । वडवाया दास्या निग्रहात् सम्भोगत्यागात् । कात्यायनः—

स्वदासीं यस्तु सङ्गच्छेत् प्रसूता च भवेत्तदा ।
अवेक्ष्य बीजं कर्तव्या अदासी सान्वयातु सा ॥

इदं तु स्वामिनः पुत्राद्यसत्व एवेति प्रकाशपारिजातरत्नाकरादयः । प्रसादेनाप्यदासः कार्यस्तत्र विधिमाह नारदः—

स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः ।
स्कन्धादादाय तस्याशु भिन्द्यात् कुम्भं सहाऽम्भसा ॥
साक्षताभिः सुपुष्पाभिर्मूर्धन्यद्भिरवाकिरन् ।
अदास इति चोक्त्वा त्रिः प्राङ्मुखस्तमथोत्सृजेत् ॥
ततःप्रभृति वक्तव्यः स्वाम्यनुग्रहपालितः ।
भोज्यान्नोऽथ प्रतिग्राह्यो भवत्यभिमतः सताम् ॥

कात्यायनः—

दासस्य तु धनं यत्स्यात् स्वामी तस्य प्रभुः स्मृतः ।
प्रसादविक्रयाद्यं तु न स्वामी धनमर्हति ॥
दासेनोढा त्वदासी या सापि दासत्वमाप्नुयात् ।
यस्माद्भर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः ॥

प्रसादेति । स्वात्मप्रसादेनाऽऽत्मविक्रयेण च यल्लब्धं तद्धनं स्वामी

नार्हतीत्यर्थः। दासेनेति। अत्र यदि व्ययाद्दासपदोपस्थापितप्रतियोगिकमेवादासीत्वं, ततोऽस्वामिकाऽन्यस्वामिका वा परिणीता सती वरस्वामिनः स्वीभवति। अर्थाच्च दासोढत्वं पूर्वस्वामिदासमोक्षहेतुभिरिति लभ्यते। अत एव तत्प्रकरणे वाक्यमिदम्। पूर्वस्वाम्यनुमत्या च दासकृतो विवाहः स्वत्वहेतुः । विमतिविषये तु चेटिकापरिणयवन्न पूर्वस्वामिस्वत्वहानिः । आधुनिकास्तु यदि प्रागनुमतिं विना दासेनोढा तदा गौरीवराटिकामात्रमग्रस्वामिने दातव्यमुत्तरस्वामिना, न तु दास्यनुत्पत्तिरेव । गौरीवराटिकाग्रहणमात्रप्रयोजकस्यैव दासत्वस्य पूर्वस्वामिनिरूपितस्य तत्र सत्त्वादिति वदन्ति । यत्तु—

न स्वामिना विसृष्टोऽपि शूद्रो दास्यात्प्रमुच्यते ।
निसर्गजं हि तत्तस्य कस्तं तस्माद्यपोहतु ॥

इति मार्कण्डेयपुराणे हरिश्चन्द्रवाक्यं, तद्दासनिन्दापरम्। अन्यथा तस्यैव दास्यान्मोक्षो न स्यादित्यवधेयम् । प्रव्रज्येति। संन्यासग्रहणानन्तरं ततः प्रच्युतो यो भवति स राज्ञो दास आमरणान्तिकः मरणावधि विद्यमानदासभावः, अस्य न दासस्य मोक्ष इति भावः। वर्णानामिति । अनुलोमक्रमेणैव दास्यं भवति न प्रतिलोमक्रमेण। यथा ब्राह्मणस्य क्षत्रियो दासो न तु वैश्यस्येत्यादि । इदं तु प्रव्रज्यावसितभिन्नपरम् ।

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।
स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता ॥

इति नारदवचनात् । वर्णानामिति प्रव्रज्यावसित इति च ब्राह्मणभिन्नपरम् ।

प्रव्रज्यावसितं यत्र त्रयो वर्णा द्विजातयः ।
निर्वासं कारयेद्विप्रं दासत्वक्षत्रविन्नृपः ॥

क्षत्रविदिति समाहारद्वन्द्वः ॥ १८२-१८३ ॥

(मिता०) साम्प्रतमभ्युपेत्याशुश्रूषाख्यमपरं विवादपदमभिधातुमुपक्रमते। तत्स्वरूपं च नारदेनोक्तम्— 'अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते' ॥ इति । आ(१)ज्ञाकरणं शुश्रूषा तामङ्गीकृत्य पश्चाद्यो न संपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यम्। शुश्रूषकश्च पञ्चविधः—शिष्योऽन्तेवा

(१) आज्ञाकारणं ख. ।

सी भृतकोऽधिकर्मकृद्दास इति । तेषामाद्याश्चत्वारः कर्मकरा इत्युच्यन्ते, ते च शुभकर्मकारिणः । दासाः पुनर्गृहजातादयः पञ्चदशप्रकाराः । गृहद्वाराशुचिस्थानरथ्यावस्करशोधनाद्यशुभकर्मकारिणः । तदिदं नारदेन स्पष्टीकृतम्—'शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः । चतुर्विधाः कर्मकरास्तेषां दासास्त्रिपञ्चकाः ॥ शिष्यान्तेवासिभृतकाश्चतुर्थ(१)स्त्वधिकर्मकृत् । एते कर्मकरा ज्ञेया दासास्तु गृहजादयः ॥ सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः । जाति(२)कर्मकृतस्तूक्तो विशेषो वृत्तिरेव च ॥ कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च । अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् ॥ गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् । गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥ इच्छतः स्वामिन(३)श्चाङ्गैरुपस्थानमथान्ततः । अशुभं कर्म विज्ञेयं शुभमन्यदतः परम्' ॥ इति । तत्र शिष्यो वेदविद्यार्थी । अन्तेवासी शिल्पशिक्षार्थी । मूल्येन यः कर्म करोति स भृतकः । कर्म कुर्वतामधिष्ठाताऽधिकर्मकृत् । अशुचिस्थानमुच्छिष्टप्रक्षेपार्थं गर्तादिकम् । अवस्करो गृहमार्जितपांस्वादिनिच(४)यस्थानम् । उज्झनं त्यागः । भृतकश्चात्र त्रिविधः । तदुक्तम्—'उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः । अधमो भारवाही स्यादित्येवं त्रिविधो भृतः' ॥ इति । दासाः पुनः—'गृहजातस्तथा क्रीतो लब्धो दायादुपागतः । अनाकाल(५)भृतस्तद्वदाहितः स्वामिना च यः ॥ मोक्षि(६)तो महतश्चर्णाद्युद्धप्राप्तः पणे जितः । तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः । विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः' ॥ गृहे दास्यां जातो गृहजातः । क्रीतो मूल्येन । लब्धः प्रतिग्रहादिना । दायादुपागतः पित्रादिदासः । अनाकालभृतो दुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः । आहितः स्वामिना धनग्रहणेनाधितां नीतः । ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः । युद्धप्राप्तः समरे विजित्य गृहीतः । पणे जितो यद्यस्मिन्विवादे पराजितोऽहं तदा त्वद्दासो भवामीति परिभाष्य जितः । तवाहमित्युपगतः तवाहं दास इति स्वयं संप्रतिपन्नः । प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः । कृतः एतावत्कालं त्वद्दास इत्यभ्युपगमितः । भक्तदासः

(१) आधिकर्मकृत् घ. । (२) कर्मकरस्तूक्तो ख. । (३) स्वामिनः स्वाङ्गैः घ. ।
(४) निर्वापस्थानम् घ. । (५) भृतश्चैव घ. । (६) मोचितो घ. ।

सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः । वडवाहृतः वडवा गृहदासी तयाहृतः तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः। य आत्मानं विक्रीणीतेऽसावात्मविक्रेतेत्येवं पञ्चदश प्रकाराः । यत्तु मनुना (८।४१५)—'ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ । पैतृको दण्डदासश्च सप्तैते दासयोनयः' ॥ इति सप्तविधत्वमुक्तं तत्तेषां दासत्वप्रति(१)पादनार्थं न तु परिसंख्यार्थम् । तत्रैषां शिष्यान्तेवासिभृतकाधिकर्मकृद्दासानां मध्ये शिष्यवृत्तिः प्रागेव प्रतिपादिता। 'आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्' इत्यादिना । अधिकर्मकृद्भृतकानां तु भृतिं वेतनादानप्रकरणे वक्ष्यते । 'यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम्' इत्यादिना ॥

दासान्तेवासिनोस्तु धर्मविशेषं वक्तुमाह—

बलादिति। बलात् बलावष्टम्भेन यो दासीकृतः । यश्चौरैरपहृत्य विक्रीतः।अपिशब्दादाहितो दत्तश्च स मुच्यते।यदि स्वामी न मुञ्चति तर्हि राज्ञा मोचयितव्यः। उक्तं च नारदेन—"चौरापहृतविक्रीता ये च दासीकृता बलात्। राज्ञा मोचयितव्यास्ते दास्यं तेषु हि नेष्यते' ॥ इति । चौरव्याघ्राद्यवरुद्धस्य स्वामिनः प्राणान् यः प्रददाति रक्षत्यसावपि मोच(२)यितव्यः। तदिदं सर्वदासानां साधारणं दास्यनिवृत्तिकारणम् । 'यो वैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्। दासत्वात्स विमुच्येत पुत्रभागं लभेत च' ॥ इति नारदस्मरणात् । भक्तदासादीनां प्रातिस्विकमपि मोक्षकारणमुच्यते । अनाकालभृतभक्तदासौ भक्तस्य त्यागाद्दासभावादारभ्य स्वामिद्रव्यं यावदुपभुक्तं तावद्दत्त्वा मुच्येते। आहितर्णदासौ तु तन्निष्क्रयाद्यद् गृहीत्वा स्वामिना आहितो यच्च दत्त्वा धनिनोत्तमर्णान्मोचितस्तस्य प्रत्यर्पणान्मुच्यते । नारदेन विशेषोऽप्युक्तः—'अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्। सम्भक्षितं यद् दुर्भिक्षे न तच्छुद्ध्येत कर्मणा ॥ भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमुच्यते । आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत् ॥ ऋणं तु सोदयं दत्त्वा ऋणी दास्यात्प्रमुच्यते' ॥ इति । तथा तवाहमित्युपगतयुद्धप्राप्तपणजितकृ(३)तकवडवाहृतानां च प्रातिस्विकं मोचनकारणं च तेनै(४)वोक्तम् । यथा-

(१) प्रतिपादनपरम्। (२) मोचनीयः घ.। (३) कृतवडवा घ.। (४) नारदेनैव।

'तवाहमित्युपगतो युद्धप्राप्तः पणे जितः । (१)प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा ॥ कृतकालव्यपगमात्कृतकोऽपि विमुच्यते । निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः' ॥ इति । दासेन सह सम्भोगनिरोधादित्यर्थः । तदेवं गृहजातक्रीतलब्धदायप्राप्तात्मविक्रयिणां स्वामिप्राण(२)प्रदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेण मोक्षो नास्ति । विशेषकारणानभिधानात् । दासमोक्षश्चानेन क्रमेण कर्तव्यः । 'स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः । स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा ॥ साक्षताभिः सपुष्पाभिर्मूर्धन्यद्भिरवाकिरेत् । अदास इत्यथोक्त्वा त्रिः प्राङ्मुखं तमवासृजत्' ॥ इति तेनैवोक्तम् ॥ १८२ ॥

(मिता०) प्रव्रज्यावसितस्य तु मोक्षो नास्तीत्याह—

प्रव्रज्येति । प्रव्रज्या संन्यासस्ततोऽवसितः प्रच्युतः । अनभ्युपगतप्रायश्चित्तश्चेद्राज्ञ एव दासो भवति । मरणमेव तद्दासत्वस्या(३)न्तोऽन्यस्मिन्काले न मोक्षोऽस्ति ॥

(मिता०) वर्णापेक्षया दास्यव्यवस्थामाह—

वर्णानामिति । ब्राह्मणादीनां वर्णानामानुलोम्येन दास्यम् । ब्राह्मणस्य क्षत्रियादयः । क्षत्रियस्य वैश्यशूद्रौ । वैश्यस्य शूद्र इत्येवमानुलोम्येन दासभावो भवति न प्रातिलोम्येन । स्वधर्मत्यागिनः पुनः परिव्राजकस्य प्रातिलोम्येनापि दासत्वमिष्यत एव । यथाह नारदः—'वर्णानां प्रातिलोम्येन दासत्वं न विधीयते । स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता' ॥ इति ॥ १८३ ॥

(वी०मि०) दासधर्मानभिधायाऽन्तेवासिधर्मानाह—

कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे ॥
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥ १८४ ॥

त्वद्गृहे एतावत्कालं वसिष्यामीति कृतं व्यवस्थापितं कालं व्याप्य गुरोर्गृहे कृतशिल्पोऽपि लब्धशिल्पविद्योऽपि अन्तेवासी गुरोः सकाशात् प्राप्तं भोजनं येन तादृशः तस्य शिल्पस्य फलं वेतनं गुरवे ददन्निवसेत् । शिल्पातिरिक्तं च कर्म नान्तेवासिनं कारयेत् ।

---

(१) प्रतिशीर्षः प्रतिनिधिः । (२) प्रदानात्तत्प्रसाद घ. ।
(३) स्यान्तो नान्तरा प्रतिमोक्षोस्ति घ. ।

तदाह नारदः—

न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ।

तथा—

शिक्षयन्तमदुष्टं च यस्त्वाचार्यं परित्यजेत् ।
बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हति ॥

तथा—

गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणम् ।
शिक्षितश्चानुमान्यैनमन्तेवासी निवर्तते ॥ १८४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने अभ्युपेत्याशुश्रूषाप्रकरणम् ।

(मिता०) अन्तेवासिधर्मानाह—

कृतशिल्प इति । अन्तेवासी गुरोर्गृहे कृतकालं वर्षचतुष्टयमायुर्वेदादिशिल्पशिक्षार्थं त्वद्गृहे वसामीति यावदङ्गीकृतं तावत्कालं वसेत् । यद्यपि वर्षचतुष्टयादर्वागेव लब्धापेक्षितशिल्पविद्यः । कथं निवसेत् ? गुरुप्राप्तभोजनः गुरोः सकाशात्प्राप्तं भोजनं येन स तथोक्तः । तत्फलप्रदः तस्य शिल्पस्य फलमाचार्याय प्रददातीति तत्फलप्रदः । एवंभूतो वसेत् । नारदेन विशेषोऽप्यत्र दर्शितः—'स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया । आचार्यस्य वसेदन्ते कृत्वा कालं सुनिश्चितम् ॥ आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम् । न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ॥ शिक्षयन्तमसंदुष्टं य आचार्यं परित्यजेत् । बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हति ॥ शिक्षितोऽपि कृतं कालमन्तेवासी समाप्नुयात् । तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम् ॥ गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणम् । शिक्षितश्चानुमान्यैनमन्तेवासी निवर्तते' ॥ इति । वधशब्दोऽत्र ताडनार्थः दोषस्याल्पत्वात् ॥ १८४ ॥

इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदम् ।

(वी०मि०) अधुना संविद्व्यतिक्रमं विवादपदं निरूपयितुमुपक्रमते—

राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु ॥
त्रैविद्यं वृत्तिमद्ब्रूयात् स्वधर्मः पाल्यतामिति ॥ १८५ ॥

राजा स्वपुरे धवलगृहादिरूपं स्थानं कृत्वा तत्र ब्राह्मणान्

न्यस्य स्थापयित्वा त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद् भूहिरण्यादिसंपन्नं च कृत्वा स्वस्य वर्णाश्रमनिमित्तो धर्मो भवद्भिः पालयतां क्रियतामिति ब्रूयात् व्यवस्थापयेत् । तुशब्देन वृत्तिपरिकल्पनं विना व्यवस्था व्यवच्छिद्यते ॥ १८५ ॥

(मिता०) संप्रति संविद्व्यतिक्रमः कथ्यते । तस्य च लक्षणं नारदेन व्यतिरेकमुखेन दर्शितम्—'(१)पाखण्डिनैगमादीनां स्थितिः समय उच्यते । समयस्यानपाकर्म तद्विवादपदं स्मृतम्' ॥ इति । पारिभाषिकधर्मेण व्यवस्थानं समयस्तस्यानपाकर्माव्यातिक्रमः परिपालनं तद्व्यतिक्रम्यमाणं वि(२)वादपदं भवतीत्यर्थः ॥

तदुपक्रमार्थं किंचिदाह—

राजेति । राजा स्वपुरे दुर्गादौ स्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणान्न्यस्य स्थापयित्वा तद्ब्राह्म(३)णजातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद् भूहिरण्यादिसंपन्नं च कृत्वा स्वधर्मो वर्णाश्रमनिमित्तः श्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान् ब्राह्मणान् ब्रूयात् ॥ १८५ ॥

(वी०मि०) एवं कृतव्यवस्थैस्तैर्यत्कार्यं तदाह—

निजधर्माविरोधेन यस्तु सामायिको भवेत् ॥
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥ १८६ ॥

यः सामयिको गोप्रचारदेवगृहपालनादिरूपः समयाद्धोचारकादिकारितराजकृतव्यवस्थानिष्पन्नो धर्मः, यश्च शत्रुमण्डले तुरगादयो न प्रस्थाप्या, मम राज्येऽतिथिभिरकृतभोजनैर्न यथा स्थीयते तथा कर्तव्यमित्यादि धर्मो राज्ञा कृतः स्वेच्छया समाज्ञप्तः सोऽपि स्वधर्मः पालयतामिति व्यवस्थितो यो निजधर्माणामविरोधेन तैर्ब्राह्मणैर्यत्नेन संरक्षणीयः संपादनीयः । तुशब्देन निजधर्मविरुद्धस्य सामयिकस्य रक्षणं व्यवच्छिनत्ति । अपिशब्देन—

पूगश्रेणिगणानां च सङ्केतसमयक्रिया ।
बाधाकाले तु सा कार्या धर्मकार्ये तथैव च ॥

इति बृहस्पत्याद्युक्तराजतदीयपुरुषव्यवस्थापितातिरिक्तसमयबन्धं समुच्चिनोति । चकारेण राजाधिकृतं समुच्चिनोति ॥ ॥ १८६ ॥

---

(१) पाखण्डिनो वेदमार्गविरोधिनो वाणिज्यादिकराः । नैगमास्तदविरोधिनः । आदिपदेन त्रैविद्यानां ग्रहणम् । (२) व्यवहारपदं घ. । (३) तद्ब्राह्मणव्रातं ख ।

(मिता०) एवं नियुक्तैस्तैर्यत्कर्म कर्तव्यं तदाह—

निजेति । श्रौतस्मार्तधर्मानुपमर्देन समयान्निष्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन पालनीयः । तथा राज्ञा च निजधर्माविरोधेनैव यः सामयिको धर्मो यावत्पथिकं भोजनं देयमस्मदराति(१)मण्डलं तुरङ्गादयो न प्रस्थापनीया इत्येवंरूपः कृतः सोऽपि रक्षणीयः ॥ १८६ ॥

(वी० मि०) एतादृशव्यवस्थालङ्घने दण्डमाह—

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः ॥
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ १८७ ॥

अतिक्रमे तस्य सर्वस्वहरणं कृत्वा तं राजा निष्कासयेदित्यर्थः । अत्र ग्रन्थलाघवाय गणद्रव्यहारिदण्डस्याभिधानमवगन्तव्यम् । अयं च दण्डोऽनुबन्धातिशये द्रष्टव्यः । अनुबन्धाल्पत्वे तु—

यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम् ।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥
निगृह्य दापयेदेनं समयव्यभिचारिणम् ।
चतुःसुवर्णं षण्निष्कं शतमानं तु राजतम् ॥

इति मनूक्तदण्डानामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः ॥१८७॥

(मिता०) एवं समयधर्मः परिपालनीय इत्युक्त्वा तदतिक्रमादौ दण्डमाह—

गणद्रव्यमिति । यः पुनर्गणस्य ग्रामादिजनसमूहस्य सम्बन्धि साधारणं द्रव्यमपहरति, संवित्समयस्तां समूहकृतां रा(२)जकृतां वा यो लङ्घयेदतिक्रामेत्तदीयं सर्वं धनमपहृत्य स्वराष्ट्राद्विप्रवासयेन्निष्कासयेत् । अयं च दण्डोऽनुबन्धाद्यतिशये द्रष्टव्यः । अनुबन्धाल्पत्वे तु (मनुः ८।२१९।२२०)—'यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम् । विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥ निगृह्य दापयेदेनं समयव्यभिचारिणम् । चतुःसुवर्णं षण्निष्कं शतमानं च राजतम्' ॥ इति मनुप्रतिपादितदण्डानां निर्वासनचतुःसुवर्णषण्निष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः ॥१८७॥

---

(१) मण्डले घ. । (२) राज्ञा कृतां ग. ।

(वी० मि०) राजव्यवस्थापित इव ग्रामादिसमूहवादिव्यवस्थापितोऽप्यर्थो न लङ्घनीय इत्याह—

कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ॥
यस्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमम् ॥ १८८ ॥

समूहहितं सेतुबन्धनकारित्वादिकं वदतां कर्तव्यमिति ब्रुवतां वचनं तत्सर्वैरेव संपादनीयम् । यस्तु तत्र विपरीतः प्रतिकूलः स्यात् स प्रथमसाहसं दमं दाप्यः ॥ १८८ ॥

(मिता०) इदं च तैः कर्तव्यमित्याह—

कर्तव्यमिति । गणिनां मध्ये ये समूहहित(१)वादनशीलास्तद्वचनमितरैर्गणानामन्तर्गतैरनुसरणीयम् ॥

(मिता०) अन्यथा दण्ड इत्याह—

यस्तत्रेति । यस्तु गणिनां मध्ये समूहहितवादिवचनप्रतिबन्धकारी स राज्ञा प्रथमसाहसं दण्डनीयः ॥ १८८ ॥

(वी० मि०) तादृशवचनकारिषु राजकृत्यमाह—

समूहकार्य आयातान् कृतकार्यान् विसर्जयेत् ॥
स दानमानसत्कारैः पूजयित्वा महीपतिः ॥ १८९ ॥

समूहहितकार्यार्थं स्वसमीपमागतान् कृतकार्यान् सर्वानेव दानमानसहितैः सत्कारैः पूजयित्वा महीपतिर्विसर्जयेदित्यर्थः ॥ १८९ ॥

(मिता०) राज्ञा चे(२)त्थं गणिषु वर्तनीयमित्याह—

समूहकार्य इति । समूहकार्यनिवृत्त्यर्थं स्वपार्श्वं प्राप्तान् गणिनो निर्वर्तितात्मीयप्रयोजनान् दानमानसत्कारैः स राजा परितोष्य विसर्जयेत् ॥ १८९ ॥

(वी० मि०) यदा समूहकार्यार्थं सर्वे राजसन्निधिं नाऽऽयान्ति किं तु सर्वैरेक एव तत्र प्रहीयते, तदा कथं सर्वेषां सत्कार इत्यत आह—

समूहकार्ये प्रहितो यल्लभेत तदर्पयेत् ॥
एकादशगुणं दाप्यो यद्यसौ नाऽर्पयेत्स्वयम् ॥ १९० ॥

समूहहिते कार्ये निमित्तभूते प्रहित एकः कश्चिद्राजसन्निधौ यत्

(१) हितवदन घ. । (२) चैवं गणिषु वर्तितव्यं घ. ।

लभेत तत्सर्वेभ्यो विभज्यार्पयेत् । यद्यसौ स्वयं नार्पयेत्तदा राजाऽर्पितमेकादशगुणितं दाप्यः । तथा चैकस्य यः सत्कारो राज्ञा कृतः स एव सर्वेषामपीति भावः ॥ १९० ॥

(मिता०) समूहदत्तापहारिणं प्रत्याह—

समूहकार्यप्रहित इति । समूहकार्यार्थं महाजनैः प्रेरितो राजपार्श्वे यद्धिरण्यवस्त्रादिकं लभते तदप्रार्थित एव महाजनेभ्यो निवेदयेत् । अन्यथा लब्धादेकादशगुणं दण्डं दापनीयः ॥ १९० ॥

धर्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः ॥
कर्तव्यं वचनं तेषां समूहहितवादिनाम् ॥ १९१ ॥

(वी० मि०) श्रौतस्मार्तधर्मज्ञा बाह्यान्तरशौचवन्तो लोभशून्याः समूहहितकार्यचिन्तकाः राज्ञा कर्तव्या भवेयुः । एतेषां समूहहितवादिनां वचनमकरणे दण्डप्रसक्त्याऽवश्यं सर्वैः कर्तव्यमित्यर्थः ॥१९१॥

(मिता०) एवंप्रकाराश्च कार्यचिन्तकाः कार्या इत्याह—

धर्मज्ञा इति । श्रौतस्मार्तधर्मज्ञा बाह्याभ्यन्तरशौचयुक्ता अर्थेष्वलुब्धाः कार्यविचारकाः कर्तव्याः । तेषां वचनमितरैः कार्यमित्येतदादरार्थं पुनर्वचनम् ॥ १९१ ॥

(वी० मि०) त्रैविद्यानामुक्तं धर्मं श्रेण्यादिष्वतिदिशति—

श्रेणिनैगमपाखण्डिगणानामप्ययं विधिः ॥
भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत् ॥ १९२ ॥

एकपण्यशिल्पोपजीविसमुदायः श्रेणयो, नैगमाः पौराः, पाखण्डिनो वेदप्रामाण्यानभ्युपगन्तारः, गण आयुधीयादीनामेककर्मप्रवृत्तानां समुदायः । अयं निजधर्माविरोधेनेत्यादिना प्राग् विहितो विधिः । अपिशब्देन राजाधिकारिणां समुच्चयः । प्रसङ्गादेतेषु राज्ञः कृत्यमाह पूर्वसिद्धां तेषां वृत्तिं पालयेत् । आद्यचकारेण प्रागुक्तानां ब्राह्मणानां समुच्चयः । द्वितीयचकारेणाऽवृत्तीनां वृत्तिं कल्पयेदिति समुच्चीयते ॥ १९२ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने संविद्व्यतिक्रमप्रकरणम् ॥

(मिता०) इदानीं त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्यादिष्वतिदिशन्नाह—

श्रेणीति । एकपण्यशिल्पोपजीविनः श्रेणयः । नैगमाः ये वेदस्याप्तप्रणीतत्वेन प्रामाण्यमिच्छन्ति पाशुपतादयः । पाखण्डिनो ये वेदस्य प्रामाण्यमेव नेच्छन्ति नग्नाः सौगतादयः । गणो व्रातः आयुधीयादीनामेककर्मोपजीविनाम् । एषां चतुर्विधानामप्ययमेव विधिर्यो निजधर्माविरोधेनेत्यादिना प्रतिपादितः । एतेषां च श्रेण्यादीनां भेदं धर्मव्यवस्थानं नृपो रक्षेत् पूर्वोपात्तां वृत्तिं च पालयेत् ॥ १९२ ॥

इति संविद्व्यतिक्रमप्रकरणम् ।

(वी० मि०) अथ—

भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः ।
वेतनस्याऽनपाकर्म तद्विवादपदं स्मृतम् ॥

इति नारदोक्तं वेतनानपकर्माख्यं विवादपदं निरूपयति—

गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत् ॥
अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥ १९३ ॥

गृहीतवेतनो भृतकोऽधिकर्मकृच्चाऽङ्गीकृतं कर्म त्यजन् समं व्यवस्थापितवेतनतुल्यं धनं महीक्षिता दाप्यः । अथ बलाद् भृतिं दत्त्वा कर्म कारयितव्यः ।

कर्माऽकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात् ।

इति नारदवचनात् । इदमारभ्याऽकुर्वतः । अनारंभे तु—

भृतोऽनार्तो न यो कुर्याद्दर्पात्कर्म यथोदितम् ।
स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम् ॥

इति मनुवचनाद्व्यवस्था । 'त्यज'न्नित्यनेन स्वकृते कर्मत्यागे दण्ड उक्तः, अन्यथा तु—

स्वामिदोषादपक्रामन् यावत्कृतमवाप्नुयात् ।

इति नारदवचनाद्व्यवस्था द्रष्टव्या । भृत्यैश्च स्वामिनः उपस्करः प्रग्रहलाङ्गलादिको रक्षणीयः । अरक्षणे च भृत्यैतन्नष्टं स्वामिने देयमिति भावः । यत्र यादृशी भृतिः परिभाषिता स्वामिभृत्याभ्यां तादृशी तत्र भृतिर्भृत्येन लभ्यत इति स्पष्टत्वादुपेक्ष्या ॥ १९३ ॥

(मिता०) संप्रति वेतनस्यानपाकर्माख्यं व्यवहारपदं प्रस्तूयते । तत्स्वरूपं च नारदेनोक्तम्—(१)'भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः । वेतनस्यानपाकर्म तद्विवादपदं स्मृतम्' ॥ इति । अस्यार्थः-(१) भृत्यानां वेतनस्य वक्ष्यमाणश्लोकैरुक्तो दानादानविधिक्रमो यत्र विवापदपदे तद्वेतनस्यानपाकर्मेत्युच्यते । तत्र निर्णयमाह—

गृहीतेति । गृहीतं वेतनं येनासौ स्वाङ्गीकृतं कर्म त्यजन् अकुर्वन् द्विगुणां भृतिं स्वामिने दद्यात् । यदा पुनरभ्युपगतं कर्म अगृहीते एव वेतने त्यजति तदा समं यावद्वेतनमभ्युपगतं तावद्दाप्यो न द्विगुणम् । यद्वाङ्गीकृतां भृतिं दत्त्वा बलात्कारयितव्यः । 'कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात्' इति नारदवचनात् । भृतिरपि तेनैवोक्ता—'(२)भृत्याय वेतनं दद्यात्कर्मस्वामी यथाक्रमम् । आदौ मध्येऽवसाने वा कर्मणो यद्विनिश्चितम्' ॥ इति । तैश्च भृत्यैरुपस्कर (३)उपस्करणं लाङ्गलादीनां प्रग्रहयोक्त्रादिकं यथाशक्त्या रक्षणीयम् । इतरथा कृष्यादिनिष्पत्त्यनुपपत्तेः ॥ १९३ ॥

(वी० मि०) परिभाषिते वेतने कर्म कुर्वतो भृतकस्य किं देयमित्यत आह—

दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः ॥
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ॥ १९४ ॥

यस्तु स्वामी भृतिं वेतनमनिश्चित्य कर्म वाणिज्यादिकं भृतकद्वारा कारयेत् स वाणिज्यपशुसस्यवृद्धेर्दशमं भागं भृतकाय महीक्षिता दाप्यः । इदं तु सीरवाहकपरम् ।

त्रिभागं पञ्चभागं वा गृह्णीयात्सीरवाहकः ।
भक्ताच्छादभृतः सीराद्भागं भुञ्जीत पञ्चमम् ॥

इति बृहस्पतिवचनात् । त्रिभागो भक्ताच्छादनदानाभावे ॥ १९४ ॥

(मिता०) भृतिमपरिच्छिद्य यः कर्म कारयति तं प्रत्याह—

दाप्य इति । यस्तु स्वामी वणिक् गोमी क्षेत्रिको वा अपरिच्छिन्नवेतनमेव भृ(४)त्यं कर्म कारयति स तस्माद्वाणिज्यपशुसस्यलक्षणात्कर्मणो यल्लब्धं तस्य दशमं भागं भृत्याय महीक्षिता राज्ञा दापनीयः ॥ १९४ ॥

(१) भृतानां घ. । (२) भृताय घ. । (३) उपकरणं घ. । (४) भृत्यकर्म ग. घ. ।

(वी० मि०) भृतकस्यापराधेन स्वामिनो लाभह्रासे वेतनह्रासमाह—

देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा ॥
तत्र स्यात्स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके ॥१९५॥

यस्तु भृतकः पण्यकृष्याद्युचितं देशं कालं चाऽतीयात् विक्रयकर्षणादिकमकुर्वन् लङ्घयेत् यश्चाऽन्यथा स्वाम्यसंप्लुतेन बहुव्ययादिना लाभं कुर्यात्तत्र तस्मिन् भृतके स्वामिनो वेतनदाने छन्द इच्छा यावदिच्छति तावद्द्यान्न तु संपूर्ण वेतनमित्यर्थः । यदा पुनर्देशकालविज्ञतयाऽधिकं लाभं भृतकः करोति तदा व्यवस्थापिताद्दशमभागादेश्चाधिकं वेतनं देयम् । आद्यचकारेण क्रेतृविशेषादिकं द्वितीयचकारेणाऽमूलह्रासं समुच्चिनोति ॥ १९५ ॥

(मिता०) अनाज्ञप्तकारिणं प्रत्याह—

देशमिति । यस्तु भृत्यः पण्यविक्रयाद्युचितं देशं कालं च पण्यविक्रयाद्यकुर्वन्द(१)र्पादिनोल्लङ्घयेत्तस्मिन्नेव वा देशे काले च लाभमन्यथा व्ययाद्यतिशयसाध्यतया हीनं करोति तस्मिन्भृतके भृतिदानं प्रति स्वामिनश्छन्द इच्छा भवेत् । यावदिच्छति तावद्द्यान्न पुनः सर्वामेव भृतिमित्यर्थः । यदा पुनर्देशकालाभिज्ञतयाऽधिको लाभः कृतस्तदा पूर्वपरिच्छिन्नाया (२)भृतेरधिकमपि धनं स्वामिना भृत्याय दातव्यम् ॥ १९५ ॥

(वी० मि०) अनेकभृतकसाध्यं कर्माऽधिकृत्याह—

यो यावत् कुरुते कर्म तावत्तस्य तु वेतनम् ॥
उभयोरप्यसाध्यं चेत्साध्यं कुर्याद्यथाश्रुतम् ॥ १९६ ॥

एकमेव कर्म यद्युभाभ्यां बहुभिर्वा क्रियमाणं न्यूनाधिकश्रमेण समाप्यते तदा स्वस्वकर्मानुसारेण न्यूनमधिकं च तस्य विभज्य वेतनं देयमुभयोर्बहूनां वाऽसाध्यमपि चेत् । द्वितीयभृतकदोषेणाऽसिद्धं चेत्यपिकारार्थः । साध्ये कर्मणि यथाऽङ्गीकृतं कुर्यात् । एतस्य कर्मण इदं वेतनमिति परिभाषितं वेतनं कर्मणः समाप्तावेव देयं, न त्वेकदेशस्य कृतस्य वेतनं देयम् । । वा तत्कर्मवेतनं प्रत्येकं भृतके-

(१) दर्पादिनिमुल्लंघयेत् घ. । (२) भृतेरपि किमपि धनमधिकं ख. ।

भ्यो देयं किं तु मिलिताभ्यां मिलितेभ्यो वा एकमेव वेतनं विभज्य देयमिति पर्यवसितार्थः ॥ १९६ ॥

(मिता०) अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकारमाह—

यो यावदिति । यदा पुनरेकमेव कर्म नियतवेतनमुभाभ्यां क्रियमाणं उभयोरप्यसाध्यं चेद्व्याध्याद्यभिभवादुभाभ्याम्, अपिशब्दाद्बहुभिरपि यदि न परिसमापितं तदा यो भृत्यो यावत्कर्म करोति तावत्तस्मै तत्कृतकर्मानुसारेण मध्यस्थकल्पितं वेतनं देयं न पुनः समम् । न चावयवशः कर्मणि वेतनस्यापरिभाषितत्वाददानमिति मन्तव्यम् । साध्ये तूभाभ्यां कर्मणि निर्वर्तिते यथाश्रुतं यावत्परिभाषितं तावदुभाभ्यां देयं, न पुनः प्रत्येकं कृत्स्नं वेतनं नापि कर्मानुरूपं परिकल्प्य देयम् ॥ १९६ ॥

(वी०मि०) 'भृत्यै रक्ष्य उपस्करः' इत्युक्तं, तत्राऽरक्षणे कर्मप्रातिकूल्ये च दण्डमाह—

अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ॥
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥ १९७ ॥
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि सन्त्यजन् ॥
भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च ॥ १९८ ॥

न विद्यते राजदैविकं यस्य तादृशं भाण्डं वाहकेऽज्ञानान्नाशितं तदा वाहको दाप्यः । तुशब्देन राजदैविकनष्टं व्यवच्छिनत्ति । विवाहाद्यर्थं व्यवस्थापिते दिने प्रस्थानविघ्नकारी भृतको भृत्यान्तरासम्भवे द्विगुणां भृतिं प्रकर्षेण ताडनादिनाऽतिशयपीडाकरेण प्रकारेण दाप्यः । एवकारेण कालान्तरे कर्मकारणव्यवच्छेदः । चकारेणाऽर्धमार्गे विलम्बातिशयकारिणः समुच्चयः । प्रक्रान्ते कर्मण्यारब्धे भृत्यान्तरसम्भवे तत्कर्म त्यजन् सप्तमं भागं, पथि स्वदेशमध्ये मार्गे सन्त्यजन् चतुर्थं भागं, अर्द्धपथे त्यजन् सर्वां भृतिं भृतकः प्रदाप्यः । यश्च भृत्यं दुरुपदेशादिना कर्म त्याजयति सोऽपि द्विगुणादिकां भृतिं दाप्यः । अपिचेति विकल्पव्युदासाय । दण्डसमुच्चयार्थं मनुः—

आर्तस्तु कुर्यात् स्वस्थः सन् यथाभाषितमादितः ।
स दीर्घस्यापि कालस्य स्वं लभेतैव वेतनम् ॥

अन्तरितादिनानि गणयित्वा कर्मणा तावन्त्यहानि पूरयेदित्यर्थः ।

यदि तु स्वस्थतादशायामप्यालस्यादिना न करोति तदा न भृतिं लभते ।

यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत् ।
न तस्य वेतनं देयमल्पोनस्याऽपि कर्मणः ॥

इति मनुवचनादिति संक्षेपः ॥ १९७—१९८ ॥

इति श्रीमत्० यज्ञवल्क्यव्याख्याने वेतनादानप्रकरणम् ।

(मिता०) आयुधीयभारवाहकौ प्रत्याह—

अराजदैविकामिति । न विद्यते राजदैविकं यस्य भाण्डस्य तत्तथोक्तम् । तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं तदा नाशानुसारेणासौ तद्भाण्डं दापनीयः । तदाह नारदः—'भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः । दाप्यो यत्तत्र नश्येत्तु दैवराजकृतादृते' ॥ इति । यः पुनः विवाहाद्यर्थं मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौपयिकं कर्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदासौ द्विगुणां भृतिं दाप्यः । अत्यन्तोत्कर्षहेतुकर्मनिरोधात् ॥ १९७ ॥

(मिता०) किञ्च—

प्रक्रान्त इति । प्रक्रान्ते अध्यवसिते प्रस्थाने स्वाङ्गीकृतं कर्म यस्त्यजति असौ भृतेः सप्तमं भागं दाप्यः । नन्वत्रैव विषये प्रस्थानविघ्नकृदित्यादिना द्विगुणभृतिदानमुक्तं, इदानीं सप्तमो भाग इति विरोधः । उच्यते । भृत्यान्तरोपादानावसरसम्भवे स्वाङ्गीकृतं कर्म यस्त्यजति तस्य सप्तमो भागः । यस्तु प्रस्थानलग्नसमय एव त्यजति तस्य द्विगुणभृतिदानमित्यविरोधः । यः पुनः पथि प्रक्रान्ते गमने वर्तमाने सति कर्म त्यजति स भृतेश्चतुर्थं भागं दाप्यः । अर्धपथे पुनः सर्वां भृतिं दाप्यः । यस्तु त्याजकः कर्मात्यजन्तं त्याजयति स्वामी पूर्वोक्तप्रदेशेष्वसावपि पूर्वोक्तसप्तमभागादिकं भृत्याय दापनीयः । एतच्च व्याधितादिविषयम् । (मनुः ८।२१५)—'भृत्योऽनार्तो न कुर्याद्यो दर्पात्कर्म यथोचितम् । स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्' ॥ इति मनुवचनात् । यदा पुनर्व्या(१)धाव-

(१) वाध्यायपगमे ग.।

पगतेऽन्तरितदिवसान्परिगणय्य पूरयति तदा लभत एव वेतनम्। (८।२१६)—'आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः। स दीर्घस्यापि कालस्य स्वं लभेतैव वेतनम्' ॥ इति मनुस्मरणात्। यस्त्वपगतव्याधिः स्वस्थ एव वाऽऽलस्यादिना स्वारब्धं कर्माल्पोनं न करोति परेण वा न समापयति तस्मै वेतनं न देयमिति। यथाह मनुः (८।२१७)—'यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः' ॥ इति ॥ १९८ ॥

इति वेतनादानप्रकरणम्।

(वी०मि०) अथ द्यूतसमाह्वयं नाम विवादपदम्—

अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥

इति मनुवचनात् द्विधा विभक्तमुपक्रमते—

ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ॥
गृह्णीयाद् धूर्तकितवादितरात्पञ्चकं शतम् ॥ १९९ ॥
स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ॥
जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी ॥ २०० ॥
प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमण्डले ॥
जितं ससभिके स्थाने दापयेदन्यथा स(१) तत् ॥ २०१ ॥
द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि ॥
राज्ञा सचिन्हं(२) निर्वास्याः कूटाक्षोपधिदेविनः ॥२०२॥
द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात् ॥
एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये ॥ २०३ ॥

परस्परसंप्रतिपत्त्या कितवपरिकल्पितः पणो ग्लह इत्युच्यते, तत्र ग्लहे शतिका शतिपरिमिता वृद्धिर्यस्य तस्माद् धूर्तकितवाज्जयिनः कितवात् द्यूतकारिणः सकाशात् पञ्चकं शतं शतसुवर्णादौ पञ्च सुवर्णादिकं सभिको द्यूतसमाधिष्ठाता गृह्णीयात्। इतरात् शतन्यून-

---

(१) न तत्—इति मु० पु० पाठः। (२) सचिन्हा—इति क० ख० पु० पाठः।

वृद्धेर्दशकं शतं दश माषान् गृह्णीयादित्यर्थः । तुशब्देन पराजितात् पञ्चकशतादिग्रहणं व्यवच्छिद्यते स सभिको राज्ञा सम्यक् उक्तवृत्तिकल्पनया परास्कन्दननिवारणेन च पालितः सन् राज्ञे यथाकृतं व्यवस्थानक्रमेण स्वप्राप्तद्रव्यस्य भागमंशं राज्ञे दद्यात् । जितग्लहं जेत्रे दद्यात् । पश्चात्पराजितस्थाने स्वयमुद्ग्राहयेत् साधयित्वा गृह्णीयात् । सत्यवचनं क्षमा च तदुभयवान् । सत्यवचो दद्यादित्यर्थः । यदि तु सभिको नोद्ग्राहयितुं शक्नोति तदा राज्ञा दापनीयमित्याह प्राप्त इति । नृपतिना स्वस्य भागे प्राप्ते प्रसिद्धे अप्रच्छन्ने धूर्तमण्डले कितवसमाजे सभिकसहिते स्थाने जितं सभिकाय दापयेद्राजा । यद्वा स्थाने क्रीडास्थाने स राजा सभिके दापयेदिति योज्यम् । अन्यथा राज्ञा भागेऽप्राप्ते प्रच्छन्ने वा धूर्तमण्डले सभिकानधिष्ठिते स्थाने वा जितं तु न राजा दापयेत् । द्यूतसम्बन्धिनां व्यवहाराणां द्रष्टारो निर्णायकाः साक्षिणश्च त एव । एवकारेण स्त्रीबालवृद्धिकितवेत्यादिदोषाभावापेक्षाव्यवच्छेदः । कूटैः कपटसम्बन्धैरक्षादिभिरुपधिना वञ्चनहेतुना च मणिमंत्रौषधादिना ये दीव्यन्ति ते राज्ञा सचिन्हं निर्वास्याः । तदाह नारदः—

कूटाक्षदेविनः पापान् राजा राष्ट्राद् विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः ॥

एवं च—

द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत च ।
तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥

इति मनुवचनादौ कूटज्ञदेवनपराण्येवेति मन्तव्यम् । सभिकाख्य एको राजपुरुषो मुखं प्रधानं यत्र तादृशं द्यूतं कार्यं चोरपरिचयार्थम् । 'ग्लहे शतिकवृद्धि'रित्याद्युक्तं द्यूतधर्मं समाह्वयेऽतिदिशति–एष एवेति । प्राणिना मल्लमेषादिना निर्वर्त्ये द्यूते समाह्वयनामके पूर्वोक्त एव विधिः प्रकारो ज्ञेय इत्यर्थः । बृहस्पतिः—

अन्योन्यं परिगृहीताः पक्षिमेषमृगादयः ।
प्रहरन्ते कृतपणास्तं वदन्ति समाह्वयम् ॥
द्वन्द्वयुद्धेन यः कश्चिदवसादमवाप्नुयात् ।
तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः ॥
ग्लहः प्रकाशः कर्तव्यो निर्वास्याः कूटदेविनः ।

नारदः—

अनिर्दिष्टं तु यो राज्ञा द्यूतं कुर्यात्तु मानवः ।
न स तं प्राप्नुयात् कामं विनयं चैव सोऽर्हति ॥
परीहासकृतं यच्च यच्चाप्यविदितं नृपे ।
तत्रापि प्राप्नुयात् कामं विनयं चैव सोऽर्हति ॥

विष्णुः-'द्यूते कपटाक्षदेविनां करच्छेदः, उपधिदेविनां च सन्दंशोऽङ्गुष्ठतर्जन्योः' ॥ १९९—२०३ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने द्यूतसमाह्वयप्रकरणम् ॥

(मिता०) अधुना द्यूतसमाह्वयाख्यं वि(१)वादपदमधिक्रियते। तत्स्वरूपं च नारदेनाभिहितम्—'अ(२)क्षब्रध्नशलाकाद्यैर्देवनं जिह्मकारितम् । पणक्रीडावयोभिश्च पदं द्यूतसमाह्वयम्' ॥ इति । अक्षाः पाशकाः । ब्रध्नश्चर्मपट्टिका । शलाका दन्तादिमय्यो दीर्घचतुरस्राः । आद्यग्रहणाच्चतुरङ्गादिक्रीडासाधनं करितुरङ्गरथादिकं गृह्यते । तैरप्राणिभिर्यद्देवनं क्रीडा पणपूर्विका क्रियते । तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः चशब्दान्मल्लमेषमहिषादिभिश्च प्राणिभिर्या पणपूर्विका क्रीडा क्रियते तदुभयं यथाक्रमेण द्यूतसमाह्वयाख्यं विवादपदम् । द्यूतं च समाह्वयश्च द्यूतसमाह्वयम् । तदुक्तं मनुना (९।२२३)—'अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते । प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः' ॥ इति । तत्र द्यूतसभाधिकारिणो वृत्तिमाह—

ग्लह इति । परस्परसम्प्रतिपत्त्या कितवपरिकल्पितः पणो ग्लह इत्युच्यते । तत्र ग्लहे तदाश्रया शतिका शतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिस्तस्माद्धूर्तकितवात्पञ्चकं शतमात्मवृत्त्यर्थं सभिको गृह्णीयात् । पञ्चपणा आयो यस्मिन् शते तत्पञ्चकं शतम् । 'तदस्मिन्वृद्ध्यायलाभ'इत्यादिना कन् । जितग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः । सभा कितवनिवासार्था यस्यास्त्यसौ सभिकः । कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरुच्यते । इतरस्मात्पुनरपरिपूर्णशतिकवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादिति यावत् ॥ १९९ ॥

---

(१) व्यवहारपदमधि घ. । (२) अक्षबन्ध ख. ।

(मिता०) एवं क्लृप्तवृत्तिना सभिकेन किं कर्तव्यमित्याह—

स इति । य एवं क्लृप्तवृत्तिर्द्यूताधिकारी स राज्ञा धूर्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथा सम्प्रतिपन्नमंशं दद्यात् । तथा (१)जितं यद्द्रव्यं तदुद्ग्राहयेत् बन्धकग्रहणेनासेधादिना च पराजितसकाशादुद्धरेत् । उद्धृत्य च तद्धनं जेत्रे जयिने सभिको दद्यात् । तथा क्षमी भूत्वा सत्यं वचो विश्वासार्थं द्यूतकारिणां दद्यात् । तदुक्तं नारदेन—'सभिकः कारयेत् द्यूतं देयं दद्याच्च तत्कृतम्'। इति ॥२००॥

(मिता०) यदा पुनः सभिको दापयितुं न शक्नोति तदा राजा दापयेदित्याह—

प्राप्त इति । प्रसिद्धे अप्रच्छन्ने राजाध्यक्षसमन्विते ससभिके सभिकसहिते कितवसमाजे सभिकेन च राजभागे दत्ते राजा धूर्तकितवमविप्रतिपन्नं जितं पणं दापयेत् । अन्यथा प्रच्छन्ने सभिकरहिते अदत्तराजभागे (२)द्यूतं जितपणं जेत्रे न दापयेत् ॥ २०१ ॥

(मिता०) जयपराजयविप्रतिपत्तौ निर्णयोपायमाह—

द्रष्टार इति । द्यूतव्यवहाराणां द्रष्टारः सभ्यास्त एव कितवा एव राज्ञा नियोक्तव्याः । न तत्र श्रुताध्ययनसम्पन्ना इत्यादिर्नियमोऽस्ति । साक्षिणश्च द्यूते द्यूतकारा एव कार्याः । न तत्र स्त्रीबालकवृद्धकितवेत्यादिनिषेधोऽस्ति ॥

(मिता०) क्वचित् द्यूतं निषेद्धुं दण्डमाह—

राज्ञेति । कूटैरक्षादिभिरुपधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत् । नारदेन तु निर्वासने विशेष उक्तः—'कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् । कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः' ॥ इति । यानि च मनुवचनानि द्यूतनिषेधपराणि (मनुः ९।२२४)–'द्यूतं समाह्वयं चैव यः कुर्यात् कारयेत वा । तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः' ॥ इत्यादीनि, तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि ॥ २०२ ॥

(मिता०) किञ्च—

द्यूतमिति । यत्पूर्वोक्तं द्यूतं तदेकमुखं एकं मुखं प्रधानं यस्य

(१) जितं द्रव्यमुद्ग्राहयेत् ख. । (२) द्यूते पणं जेत्रे ख. ।

द्यूतस्य तत्तथोक्तं कार्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः । तस्करज्ञानकारणात् तस्करज्ञानरूपं प्रयोजनं पर्यालोच्य । प्रायशश्चौर्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्यम् ॥

(मिता०) द्यूतधर्मं समाह्वयेऽतिदिशन्नाह—

एष इति । ग्लहे शतिकवृद्धेरित्यादिना यो द्यूतधर्म उक्तः स एव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्ये समाह्वयसंज्ञके ज्ञातव्यः ॥ २०३ ॥

इति द्यूतसमाह्वयाख्यं प्रकरणम् ।

(वी०मि०) अथ वाक्पारुष्यं नाम विवादपदम्—

देशजातिकुलादीनामाक्षेपं न्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥

इति नारदेन लक्षितं निरूपयति—

सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् ॥
क्षेपं करोति चेद्दण्ड्यः पणानर्धत्रयोदशान् ॥ २०४ ॥
अभिगन्तास्मि भगिनीं मातरं वा तवेति ह ॥
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ॥ २०५ ॥
अर्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च ॥
दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः ॥ २०६ ॥
प्रातिलोम्यापवादेषु(१)चतुस्त्रिद्विगुणा दमाः ॥
वर्णानामानुलोम्येन तस्मादर्धार्धहानितः ॥ २०७ ॥
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ॥
शत्यस्तदर्धिकः पादनासाकर्णकरादिषु ॥ २०८ ॥
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश ॥
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ॥ २०९ ॥

(१) द्विगुणास्त्रिगुणा दमाः—इति मु० पु०पाठः ।

पतनीयकृते क्षेपे दण्डो मध्यमसाहसः ॥
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम् ॥ २१० ॥
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ॥
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥ २११ ॥

वाक्पारुष्यं तावत्त्रिविधम् । तदाह बृहस्पतिः—

देशकालकुलादीनां क्षेपः पापे नियोजनम् ।
द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते ॥
भगिनीमातृसम्बन्धमुपपातकशंसनम् ।
पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः ॥
अभक्ष्यापेयकथनं महापातकदूषणम् ।
पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनम् ॥

इति । द्रव्यं पदार्थं विनाऽसत्यमिति यावत्, तेनासत्यं पापसामान्याङ्गवैकल्यनीचकुलत्वाद्यभिधानमधममसत्यमुपपातकाभिधानं मध्यममसत्यं महापातकाभिधानमुत्तमं वाक्पारुष्यमित्यर्थः । तत्राद्ये दण्ड उच्यते । सत्यमन्धोऽसीत्याद्यभिधानमसत्यमनन्धादेस्तथाभिधानम् । अन्यथास्तोत्रं निन्दापर्यायस्तुतिवाक्यमन्धादेः पुण्डरीकचक्षुरसीत्याद्यभिधानम् । एतैश्चेत् न्यूनाङ्गादीनां सम्बधि न्यूनाङ्गत्वन्यूनेन्द्रियत्वरोगित्वप्रभृति पर्यायम् । क्षेपं भर्त्सनं करोति तदाऽर्धत्रयोदश सार्द्धद्वादश पणान् दण्ड्यः । इदं च समजातिगुणपरम् । तदाह बृहस्पतिः—

समजातिगुणानां तु वाक्पारुष्यं परस्परम् ।
विनयोऽभिमतः शास्त्रे पणा अर्धत्रयोदश ॥
समानयोः समो दण्डो न्यूनस्य द्विगुणस्तु सः ।
उत्तमस्यर्द्धिकल्पोक्तो वाक्पारुष्यं परस्परम् ॥

मात्रादौ तु वाक्पारुष्ये विशेषमाह मनुः—

मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानं चाऽददद्गुरोः ॥

मात्रादेर्निरपराधत्वे जायायाः सापराधत्वे चैतदिति मिताक्षरा । तव भगिनीं मातरं वाऽभिगन्तास्मि मिथुनं भूयोऽपि भोक्ष्यमाणोऽहमिति शपन्तं उद्वेजयन्तं समजातिगुणं राजा पञ्चविंशतिपणमितं

दमं दापयेत् । वाशब्दो अनास्थायां, तेन पुत्रीं जायां वा तवाऽभिगन्ताहमित्यादिकमपि सङ्गृहीतम् । हशब्दः पादपूरणे । अर्धत्रयोदशपणमितः पञ्चविंशतिपणमितो वा यो दण्डः समेषूक्तः सोऽधमेषु पतनीयेष्वर्धो भवति । परस्त्रीषूत्तमेषु च समेषूक्तो द्विगुणो भवति । अधमोत्तमत्वेन जात्या गुणेन वा वर्णतत्सङ्करपरस्परं वाक्पारुष्यं त्वाह दण्डेति । वर्णा ब्राह्मणादयः, जातयो मूर्धावसिक्तादयः उत्तराधरा उत्तमाधमास्तैःपरस्परमाक्षेपे दण्डस्य प्रकर्षेण नयनमूहनं कार्यम् । यथा मूर्द्धावसिक्तं ब्राह्मणाद्धीनं क्षत्रियादुत्कृष्टमाक्रुश्य ब्राह्मणः क्षत्रियाक्षेपनिमित्तदण्डात्सार्द्धगुणं ब्राह्मणाक्षेपनिमित्तदण्डात्पादोनं दद्यादिति । अर्धोऽधमेष्वित्युक्तं दृष्टान्ततयाऽभिधान एवाऽधमतरोत्कृष्टतरादौ विशेषमाह प्रातिलोम्येति । वर्णानां प्रातिलोम्येनाऽपवादो हीनतरहीनैरुत्कृष्टस्याक्रोशस्तेषु चतुर्गुणादयो यथाक्रमं दमाः । आनुलोम्येन हीनहीनतमे क्रमेणोत्कृष्टेनाक्षेपे तस्मात्समानवर्णदण्डार्धार्धहानिक्रमेण दमा भवन्ति । यथा ब्राह्मणस्याक्षेपे यो ब्राह्मणस्य दण्डः तच्चतुर्गुणः शूद्रस्य तत्त्रिगुणो वैश्यस्य तद्द्विगुणः क्षत्रियस्य ब्राह्मणाक्षेपे दण्डः । ब्राह्मणस्य ब्राह्मणाक्षेपे यो दण्डः क्षत्रियाक्षेपे तदर्धं वैश्याक्षेपे तच्चतुर्थांशः शूद्राक्षेपे तदष्टमांशो दण्डो ब्राह्मणस्य भवति । एवमन्यदुहनीयम् । बाहुं तव छिनद्मीत्यादिवाचिके बाह्वादिविनाशे शत्यः शतपणमितो दमः । पादादिषु विनाशे वाचिके सति शतार्धमितो दमः समानगुणजातिमतः । सक्थि ऊरुः, आदिग्रहणात् स्फिगादेरप्रधानस्याङ्गस्य सङ्ग्रहः । इदं च बाहुच्छेदादिशक्तपरम् । अशक्तस्तु एवं वदन् दश पणान् दण्ड्यः । शक्तश्च बाहुच्छेदाद्याक्षेपकारी तस्याशक्तस्य क्षेमाय उत्तरकालं बाहुच्छेदाद्यभावाय प्रतिभुवं दाप्यः । तुशब्देनाऽधिकतमशक्तिकव्यवच्छेदः । तथाशब्देन प्रतिभुवोऽभावे राज्ञा बन्धनीय इति समुच्चीयते । उत्तमाधमभेदेनाऽत्रापि न्यूनाधिक्यम् । उत्तमेऽधमे मध्यमे च वाक्पारुष्ये त्वाह-पतनीयैर्ब्राह्मणवधादिभिः कृते क्षेपे भर्त्सने मध्यमसाहसो दण्डः । उपपातकयुक्ते क्षेपे तु प्रथमसाहसं दण्डः दाप्यः । मध्यमसाहसादिकं प्राग्लक्षितम् । इदं च समानगुणादिपरम् । उत्तमाधमभेदेन न्यूनाधिक्यं चोहनीयम् । त्रैविद्यानां वेदत्रयसम्पन्नानां नृपाणां देवतानां च क्षेपे आदिपदेन वृक्षादिच्छेदनसङ्ग्रहः । भर्त्सने ब्राह्मणस्योत्तमसाहसो, जाति-

पूगादीनां मूर्धावसिक्तादिसमूहानां क्षेपे मध्यमसाहसो, ग्रामस्य देशस्य च क्षेपे प्रथमसाहसो दण्डः । क्षत्रियादेस्तु द्वैगुण्यादिकमूहनीयम् । पतनीयाक्रोशे मनुः—

ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विधानतः ।
ब्राह्मणे साहसः पूर्वः क्षत्रिये चैव मध्यमः ॥

शूद्रानुवृत्तौ बृहस्पतिः—

विक्रोशकस्तु विप्राणां जिह्वाछेदनमर्हति ।

तथा—

नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः
विधेयोऽयोमयः शङ्कुर्ज्वलनास्ये दशाङ्गुलः ॥

इदं तु मात्सर्यानुबन्धातिशयपूर्वकाक्रोशपरमित्याभाति॥२०४-२११॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने वाक्पारुष्यप्रकरणम् ।

(मिता०) इदानीं वाक्पारुष्यं प्रस्तूयते । तल्लक्षणं चोक्तं नारदेन—'देशजातिकुलादीनामाक्रोशं न्यङ्गसंयुतम् । यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते' ॥ इति । देशादीनामाक्रोशं न्यङ्गसंयुतम् । उच्चैर्भाषणमाक्रोशः, न्यङ्गमवद्यं तदुभययुक्तं यत्प्रतिकूलार्थमुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते । तत्र कलहप्रियाः खलु गौडा इति देशाक्रोशः । नितान्तं लो(१)लुपाः खलु विप्रा इति जात्याक्रोशः । क्रूरचरिता ननु वैश्वामित्रा इति कुलाक्षेपः । आदिग्रहणात्स्वविद्याशिल्पादिनिन्दया विद्वच्छि(२)ल्प्यादिपुरूपाक्षेपो गृह्यते । तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम्—'निष्ठुराश्लीलतीव्रत्वादपि तत्त्रिविधं स्मृतम् । गौरवानुक्रमात्तस्य दण्डोऽपि स्यात्क्रमाद् गुरुः । साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् । पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः' ॥ इति । तत्र धिङ्मूर्ख(३) जाल्ममित्यादि साक्षेपम् । अत्र न्यङ्गमित्यसभ्यम् । अवद्यं भगिन्यादिगमनं तद्युक्तमश्लीलम् । सुरापोऽसीत्यादिमहापातकाद्याक्रोशैर्युक्तं वचस्तीव्रम् ॥

(१) खलु लोलुपाः ख. । (२) शिल्पादि ख. घ. ।
(३) धिङ्मूर्ख जाल्मस्त्वमित्यादि ग. ।

तत्र निष्ठुराक्रोशे सवर्णविषये दण्डमाह—

सत्यासत्येति । न्यूनाङ्गाः करचरणादिविकलाः । न्यूनेन्द्रिया नेत्रश्रोत्रादिरहिताः । रोगिणो दुश्चर्मप्रभृतयः । तेषां सत्येनासत्येनान्यथास्तोत्रेण च निन्दार्थया स्तुत्या । यत्र नेत्रयुगलहीन एषोऽन्ध इत्युच्यते तत्सत्यम् । यत्र पुनश्चक्षुष्माने(१)वान्ध इत्युच्यते तदसत्यम् । यत्र विकृताकृतिरेव दर्शनीयस्त्वमसीत्युच्यते तदन्यथास्तोत्रम् । एवंविधैर्यः क्षेपं निर्भर्त्सनं करोत्यसौ अर्धाधिकद्वादशपणान्दण्डनीयः । (मनुः ८।२७४)—'काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरम्' ॥ इति यन्मनुवचनं तदतिदुर्वृत्तवर्णविषयम् । यदा पुनः पुत्रादयो मात्रादीन् शपन्ति तदा शतं दण्डनीया इति तेनैवोक्तम् । (मनुः ८।२७५)—'मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् । आक्षारयन् शतं दाप्यः पन्थानं चाददद् गुरोः' ॥ इति । एतच्च सापराधेषु मात्रादिषु गुरुषु निरपराधायां च जायायां द्रष्टव्यम् ॥ २०४ ॥

(मिता०) अश्लीलाक्षेपे दण्डमाह—

अभिगन्तास्मीति । त्वदीयां भगिनीं मातरं वा अभिगन्तास्मीति शपन्तं अन्यां वा त्वज्जायामभिगन्तेत्येवं शपन्तं राजा पञ्चविंशतिकं पणानां पञ्चाधिका विंशतिर्यस्मिन्दण्डे स तथोक्तस्तं दमं दापयेत् ॥ २०५ ॥

(मिता०) एवं समानगुणेषु वर्णिषु दण्डमभिधाय विषमगुणेषु दण्डं प्रतिपादयितुमाह—

अर्ध इति । अधमेष्वाक्षेप्त्रापेक्षया न्यूनवृत्तादिगुणेष्वर्धो दण्डः । पूर्ववाक्ये पञ्चविंशतेः प्रकृतत्वात्तदपेक्षयार्धः सार्धद्वादशपणात्मको द्रष्टव्यः । परभार्यासु पुनरविशेषेण द्विगुणः पञ्चविंशत्यपेक्षयैव पञ्चाशत्पणात्मको वेदि(२)तव्यः । तथोत्तमेषु च स्वापेक्षयाधिकश्रुतवृत्तेषु दण्डः पञ्चाशत्पणात्मक एव ॥

(मिता०) वर्णानां मूर्धावसिक्तादीनां च परस्पराक्षेपे दण्डकल्पनामाह—

दण्डेति । वर्णा ब्राह्मणादयः । जातयो मूर्धावसिक्ताद्याः । वर्णाश्च जातयश्च वर्णजातयः । उत्तराश्च अधराश्च उत्तराधराः वर्णजातयश्च

(१) नेषोऽन्ध इति ख. । (२) द्रष्टव्यः घ. ।

ते उत्तराधराश्च वर्णजात्युत्तराधराः तैः वर्णजात्युत्तराधरैः परस्परमाक्षेपे क्रियमाणे दण्डस्य प्रणयनं प्रकर्षेण नयनमूहनं वेदितव्यम् । तच्च दण्डकल्पनमुत्तराधरैरिति वि(१)शेषेणोपादानादुत्तराधरभावापेक्षयैव कर्तव्यमित्यवगम्यते । यथा मूर्धावसिक्तं ब्राह्मणाद्धीनं क्षत्रियादुत्कृष्टं चाक्रुश्य ब्राह्मणः क्षत्रियाक्षेपनिमित्तात्पञ्चाशत्पणदण्डात्किंचिदधिकं पञ्चसप्तत्यात्मकं दण्डमर्हति । क्षत्रियोऽपि तमाक्रुश्य ब्राह्मणाक्षेपनिमित्ताच्छतदण्डा(२)द्धीनं पञ्चसप्ततिमेव दण्डमर्हति । मूर्धावसिक्तोऽपि तावाक्रुश्य तमेव दण्डमर्हति । मूर्धावसिक्ताम्बष्ठयोः परस्पराक्षेपे ब्राह्मणक्षत्रिययोः परस्पराक्रोशनिमित्तकौ यथाक्रमेण दण्डौ वेदितव्यौ । एवमन्यत्राप्यूहनीयम् ॥ २०६ ॥

(मिता०) एवं सर्ववर्णविषये दण्डमभिधाय वर्णानामेव प्रातिलोमानुलोमाक्षेपे दण्डमाह—

प्रातिलोम्येति । अपवादा अधिक्षेपाः । प्रातिलोम्येनापवादाः प्रातिलोम्यापवादास्तेषु ब्राह्मणाक्रोशकारिणोः क्षत्रियवैश्ययोर्यथाक्रमेण पूर्ववाक्याद्द्विगुणपदोपात्तपञ्चाशत्पणापेक्षया द्विगुणाः शतपणाः, त्रिगुणाः सार्धशतपणा दण्डा वेदितव्याः । शूद्रस्य ब्राह्मणाक्रोशे ताडनं जिह्वाच्छेदनं वा भवति । यथाह मनुः (८।२६७)—'शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति । वैश्योऽध्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति'॥ इति । विट्शूद्रयोरपि क्षत्रियादनन्तरैकान्तरयोस्तुल्यन्यायतया शतमध्यर्धशतं च यथाक्रमेण क्षत्रियाक्रोशे वेदितव्यम् । शूद्रस्य च वैश्याक्रोशे शतम् । आनुलोम्येन तु वर्णानां क्षत्रियविट्शूद्राणां ब्राह्मणेनाक्रोशे कृते तस्माद्ब्राह्मणाक्रोशनिमित्ताच्छतपरिमितात्क्षत्रियदण्डात्प्रतिवर्णमर्धस्यार्धस्य हानिं कृत्वाऽवशिष्टं पञ्चाशत्पञ्चविं(३)शतिसार्धद्वादशपणात्मकं यथाक्रमं ब्राह्मणो दण्डनीयः । तदुक्तं मनुना (८।२६८)—'पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने । वै(४)श्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः' ॥ इति । क्षत्रियेण वैश्ये शूद्रे वाक्रुष्टे यथाक्रमं पञ्चाशत्पञ्चविंशतिकौ दमौ । वैश्यस्य च शूद्राक्रोशे पञ्चाशदित्यूहनीयम् । 'ब्राह्मणराजन्यवत्क्षत्रियवैश्ययोः' इति गौतमस्म-

(१) विशेषोपादानात् ख. । (२) दण्डादूनं ख. ।
(३) पञ्चविंशत्यर्धं द्वादश घ. । (४) वैश्यस्य चार्धपञ्चाशत् घ. ।

रणात् । 'विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः' इति (८।२७७) मनुस्मरणाच्च ॥ २०७ ॥

(मिता०) पुनर्निष्ठुराक्षेपमधिकृत्याह--

बाहुग्रीवेति । बाह्वादीनां प्रत्येकं विनाशे वाचिके वाचा प्रतिपादिते तव बाहू छिनद्मीत्येवंरूपे शत्यः शतपरिमितो दण्डो वेदितव्यः । पादनासाकर्णकरादिषु आदिग्रहणात्स्फिगादिषु वाचिके विनाशे तदर्धिकः तस्य शतस्यार्धं तदर्धं तद्यस्यास्त्यसौ तदर्धिकः पञ्चाशत्पणिको दण्डो वेदितव्यः ॥ २०८ ॥

(मिता०) किंच—

अशक्त इति । यः पुनर्ज्वरादिना क्षीणशक्तिस्त्वद्बाह्वाद्यङ्गभङ्गं करोमीत्येवं शपत्यसौ दशपणान् दण्डनीयः । यः पुनः समर्थः पूर्ववदाक्षिपत्यसौ पूर्वोक्तशतादिदण्डोत्तरकालं तस्याशक्तस्य क्षे(१)मार्थं प्रतिभुवं दापनीयः ॥ २०९ ॥

(मिता०) तीव्राक्रोशे दण्डमाह—

पतनीयेति । पातित्यहेतुभिर्ब्रह्महत्यादिभिर्वर्णि(२)नामाक्षेपे कृते मध्यमसाहसं दण्डः । उपपातक(३)संयुक्ते पुनर्गोघ्नस्त्वमसीत्येवमादिरूपे क्षेपे प्रथमसाहसं दण्डनीयः ॥ २१० ॥

(मिता०) किंच—

त्रैविद्येति । त्रैविद्याः वेदत्रयसंपन्नास्तेषां राज्ञां देवानां च क्षेपे उत्तमसाहसो दण्डः । ये पुनर्ब्राह्मणमूर्धावसिक्तादिजातीनां पूगाः संघास्तेषामक्षेपे मध्यमसाहसो दण्डः । ग्रामदेशयोः प्रत्येकमाक्षेपे प्रथमसाहसो दण्डो वेदितव्यः ॥ २११ ॥

इति वाक्पारुष्यं नाम विवादपदप्रकरणम् ।

(वी० मि०) अथ दण्डपारुष्यमुपाक्रमते । तत्स्वरूपं च नारदेनोक्तम्—

परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते ॥

इति । आदिपदेनावृक्षादिच्छेदनसङ्ग्रहः । तत्रादौ दण्डपारुष्यमनेन

---

(१) क्षेमाय घ. । (२) वर्णिनामाक्षेपे ग. । (३) 'सम्बन्धे तु घ. ।

कृतं न वेति सन्देहे निर्णायकानि तावदाह—

असाक्षिकहते चिन्हैर्युक्तिभिश्चागमेन च ॥
द्रष्टव्यो व्यवहारस्तु कूटचिन्हकृतो (१)भयात् ॥२१२॥

असाक्षिकं रहसि हते पादायुधादिना ताडिते हन्त्रा विप्रतिपत्तौ च कृतायां स व्यवहारश्चिन्हैर्व्रणादिभिर्देहस्थैर्युक्तिभिः प्रयोजनपर्यालोचनादिभिः आगमेन जनप्रवादेन चकारात् दिव्येन द्रष्टव्यो निर्णेतव्यः । कूटेति कपटचिन्हातिरिक्तैरित्यर्थः । तुशब्देनाऽहमनेन ताडित इति वाङ्मात्रेण दण्डप्रणयादि व्यवच्छिनत्ति ॥ २१२ ॥

(मिता०) दण्डपारुष्यं नाम सम्प्रति प्रस्तूयते । तत्स्वरूपं च नारदेनोक्तम्—'परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः । भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते' ॥ इति । परगात्रेषु स्थावरजङ्गमात्मकद्रव्येषु हस्तपादायुधैरादिग्रहणाद्ग्रावादिभिर्योऽभिद्रोहो हिंसनं दुःखोत्पादनं तथा भस्मना आदिग्रहणाद्रजःपङ्ककरीषाद्यैश्च य उपघातः संस्पर्शनरूपं मनोदुःखोत्पादनं तदुभयं दण्डपारुष्यम् । दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत्पारुष्यं विरुद्धाचरणं जङ्गमादेर्द्रव्यस्य तद्दण्डपारुष्यम् । तस्य चावगोरणादिकारण(२)भेदेन त्रैविध्यमभिधाय हीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात्पुनस्त्रैविध्यं तेनैवोक्तम्—'(३)तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् । अवगो(४)रणनिः(५)सङ्गपातनक्षतदर्शनैः ॥ हीनमध्योत्तमानां च(६) द्रव्याणां समतिक्रमात् । त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनम्' ॥ इति । निःसङ्गपातनं निःशङ्कप्रहरणम् । त्रीण्येव साहसानि त्रिप्रकाराण्येव सहसा(७)कृतानि दण्डपारुष्याणीत्यर्थः । तथा वाग्दण्डपारुष्ययोरुभयोरपि द्वयोः प्रवृत्तकलहयोर्मध्ये यः क्षमते तस्य न केवलं दण्डाभावः किन्तु पूज्य एव । तथा पूर्वं कलहे प्रवृत्तस्य दण्डगुरुत्वम् । कलहे च बद्धवैरानुसन्धातुरेव दण्डभाक्त्वम् । तथा द्वयोरपराधविशेषापरिज्ञाने दण्डः समः । तथा श्वपचादिभिरार्याणामपराधे कृते सज्जना एव दण्डापने-

---

(१) विना—इति क० ख० पुस्तकयोः पाठः ।
(२) करणभेदेन ख. । (३) तस्योपदृष्टं ख. । (४) गुरी उद्यमने—इत्यस्य रूपम् ।
(५) निःशङ्कापातन घ. । (६) तु-इति पाठान्तरम् ।
(७) साहसात्कृतानि—इति पाठान्तरम् ।

ऽधिकारिणस्तेषामशक्यत्वे तान् राजा घातयेदेव नार्थं गृह्णीयादित्येवं पञ्च प्रकारा विषयस्तेनैवोक्ताः–'विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि । पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोर्द्वयोः ॥ स मान्यते यः क्षमते दण्डभाग्योऽतिवर्तते । पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् ॥ पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः । द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः ॥ स तयोर्दण्डमाप्नोति पूर्वो वा यदि वेतरः । पारुष्यदोषावृतयोर्युगपत्सम्प्रवृत्तयोः ॥ विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः । श्वपाकषण्डचण्डालव्यङ्गेषु वधवृत्तिषु ॥ हस्तिपव्रात्यदासेषु गुर्वाचार्यनृपेषु च । मर्यादातिक्रमे सद्यो घात एवानुशासनम् ॥ यमेव ह्यतिवर्तेरन्नेते सन्तं जनं नृषु । स एव विनयं (१)कुर्यान्न तद्विनयभाङ् नृपः ॥ मला ह्येते मनुष्याणां धनमेषां मलात्मकम् । अतस्तान्घातयेद्राजा नार्थदण्डेन दण्डयेत्' ॥ इति ।

एवंभूतदण्डपारुष्यनिर्णयपूर्वकत्वाद्दण्डप्रणयनस्य तत्स्वरूपसन्देहे निर्णयहेतुमाह—

असाक्षिकहत इति । यदा कश्चिद्रहस्यमनेन हत इति राज्ञे निवेदयति तदा (२)चिह्नैर्वर्णादिस्वरूपगतैर्लिङ्गयुक्त्या कारणप्रयोजनपर्यालोचनात्मिकया आगमेन जनप्रवादेन चशब्दाद्दिव्येन वा कूटचिह्नकृतसम्भावनाभयात्परीक्षा कार्या ॥ २१२ ॥

(वी० मि०) अथात्र दण्डपारुष्यनिश्चयानन्तरकृत्यं दण्डं यथायथमाह प्रकरणसमाप्तिपर्यन्तेन—

भस्मपङ्करजःस्पर्शे दण्डो दशपणः स्मृतः ॥
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः ॥ २१३ ॥
समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च ॥
हीनेष्वर्धदमो मोहमदादिभिरदण्डनम् ॥ २१४ ॥

भस्मपङ्करजोभिः प्रत्येकं परस्य स्पर्शे योजने तत्कर्तुर्दशपणमितो दण्डः । अमेध्यमश्रुप्रभृति, पार्ष्णिश्चरणस्य पश्चाद्भागः, निष्ठ्यूतं मुखश्लेष्म एतैः परस्य स्पर्शने कृते तत्कर्तुस्ततो दशपणाद्द्विगुणो दण्डः । एवं दण्डः समेषु सवर्णेषु द्रष्टव्यः । परभार्यासूत्तमेषु च वर्णेषु विषये तादृशापराधे कृते समेषूक्ताद्दण्डात् द्विगुणो दमः ।

(१) कुर्यान्नूनं विनयभाक् । (२) चिह्नैर्वर्णादि ख. ।

हीनेषु वर्णेषु विषये तादृशापराधे समेषूक्तस्य दण्डस्यार्धो दमः कार्यः । मोहोऽनभिज्ञता, मदो मद्यादिभिः । आदिपदेनोन्मादपरिग्रहः । एतैर्भस्मादिस्पर्शने कृतेऽपि दण्डाभावः । चकारेणोत्तरोत्तरं त्रिगुणचतुर्गुणौ दण्डाविति समुच्चीयते । कात्यायनः—

छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः ।
षड्गुणः कायमध्ये तु मूर्ध्नि त्वष्टगुणः स्मृतः ॥

चतुर्गुणत्वादिकं दशपणाद्बोध्यम् ॥ २१३—२१४ ॥

(मिता०) एवं निश्चिते साधनविशेषेण दण्डविशेषमाह—

भस्मेत्यादि । भस्मना पङ्केन रेणुना वा यः परं स्पर्शयत्यसौ दशपणं दण्डं दाप्यः । अमेध्यमिति अश्रुश्लेष्मनखकेशकर्णविड्दूषिकाभुक्तोच्छिष्टादिकं च गृह्यते । पार्ष्णिः पादस्य पश्चिमो भागः । निष्ठ्यूतं मुखनिःसारितं जलम् । तैः स्पर्शने ततः पूर्वाद्दशपणाद्द्विगुणो विंशतिपणो दण्डो वेदितव्यः । पुरीषादिस्पर्शने पुनः कात्यायनेन विशेषः उक्तः—'छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः । षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृतः' ॥ इति । आद्यग्रहणाद्वसाशुक्रासृङ्मज्जानो गृह्यन्ते । एवंभूतः पूर्वोक्तो दण्डः सवर्णविषये द्रष्टव्यः । परभार्यासु चाऽविशेषेण । तथोत्तमेषु स्वापेक्षयाऽधिकश्रुतवृत्तेषु पूर्वोक्ताद्दशपणाद्विंशतिपणाच्च दण्डाद्द्विगुणो दण्डो वेदितव्यः । हीनेषु स्वापेक्षया (१)न्यूनवृत्तश्रुतादिषु पूर्वोक्तस्यार्धदमः पञ्चपणो दशपणश्च वेदितव्यः । मोहश्चित्तवैकल्यम् । मदो मद्यपानजन्योऽवस्थाविशेषः । आदिग्रहणाद्ग्रहावेशादिकम् । एतैर्युक्तेन भस्मादिस्पर्शने कृतेऽपि दण्डो न कर्तव्यः ॥ २१३-२१४ ॥

विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य च(२) ॥
उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्धिकः ॥ २१५ ॥
उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ ॥
परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः ॥ २१६ ॥

ब्राह्मणस्य ताडनादि पीडाकरं क्षत्रियादेरङ्गहस्तपादादि छेद्यम् । चकारेण क्षत्रियपीडाकरं वैश्यशूद्रयोः, वैश्यपीडाकरं च शूद्रस्याङ्ग

(१) न्यूनश्रुतादिषु ख. । (२) तु—इति मु० पु० पाठः ।

समुच्चीयते। केन केन—

येन केनचिदङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः ।
छेत्तव्यं तत्तदेवाऽस्य तन्मनोरनुशासनम् ॥

इति मनुवचनात् । तुशब्दपाठ ब्राह्मणाङ्गच्छेदव्यवच्छेदः । उद्गूर्णे वधार्थमुद्यते शस्त्रादौ प्रथमसाहसो दण्डः । उद्गूरणार्थं शस्त्रादेः स्वयं स्पर्शमात्रे कृते तु प्रथमसाहसार्धमितो दण्डः । प्रथमसाहसश्च शूद्रेतरपरः । शूद्रमुपक्रम्य—

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।

इति मनुवचनात् । सर्वेषां समवर्णानां तु परस्परं हस्ते उद्गूर्णे दशपणो दमः । पाद उद्गूर्णे विंशतिपणपरिमितो दमः। शस्त्र उद्गूर्णे मध्यमसाहसो दमः । आद्यतुशब्देन निपातनव्यवच्छेदः । द्वितीयतुशब्देनाऽसमानजातीयानामुक्तदण्डव्यवच्छेदः ॥२१५—२१६॥

(मिता०) प्रातिलोम्यापराधे दण्डमाह—

विप्रेति । ब्राह्मणानां पीडाकरमब्राह्मणस्य क्षत्रियादेर्यदङ्गं करचरणादिकं तच्छेत्तव्यम् । क्षत्रियवैश्ययोरपि पीडां कुर्वतः शूद्रस्याङ्गच्छेदनमेव । (मनुः ८।२७९)—'येन केनाचिदङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः । छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्' ॥ इति, द्विजातिमात्रस्यापराधे शूद्रस्याङ्गच्छेदविधानाद्वैश्यस्यापि क्षत्रियापकारिणोऽयमेव दण्डस्तुल्यन्यायत्वात् । उद्गूर्णे वधार्थमुद्यते शस्त्रादिके प्रथमसाहसो दण्डो वेदितव्यः । शूद्रस्य पुनरुद्गूर्णेऽपि हस्तादिच्छेदनमेव । (८।२८८) 'पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति' इति मनुस्मरणात् ॥ उद्गूरणार्थं शस्त्रादिस्पर्शने तु तदर्धिकः प्रथमसाहसादर्धदण्डो वेदितव्यः । भस्मादिसंस्पर्शे पुनः क्षत्रियवैश्ययोः प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमा इति वाक्पारुष्योक्तन्यायेन कल्प्यम् । शूद्रस्य तत्रापि हस्तच्छेद एव । (८।२८२) 'अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः । अवमूत्रयतो मेढ्रमवशर्धयतो गुदम्' ॥ इति मनुस्मरणात् ॥ २१५ ॥

(मिता०) एवं प्रातिलोम्यापराधे दण्डमभिधाय पुनः सजातिमाधिकृत्याह—

उद्गूर्ण इति । हस्ते पादे वा ताडनार्थमुद्गूर्णे यथाक्रमं दशपणो विंशतिपणश्च दण्डो वेदितव्यः । परस्परवधार्थं शस्त्रे उद्गूर्णे सर्वेषां

व(१)र्णिनां मध्यमसाहसो दण्डः ॥ २१६ ॥

(वी० मि०) समानजातीयानेव कृत्वाह—

पादकेशांशुककरोल्लुञ्चनेषु पणान् दश ॥
पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः ॥ २१७ ॥
शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः ॥
द्वात्रिंशतं पणान् दाप्यो द्विगुणं दर्शनेऽसृजः ॥ २१८ ॥
कर(२)पाददतो भङ्गे छेदने कर्णनासयोः ॥
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥ २१९ ॥
चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने ॥
कन्धराबाहुसक्थ्नां च भङ्गे मध्यमसाहसः ॥ २२० ॥
एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः ॥

पादादीनां परकीयानामुल्लुञ्चनेषु झटित्याकर्षणेषु दश पणा दमः । पीडिते वस्त्रावेष्टपूर्वकनिष्ठुराकृष्टस्य स्वचरणारोपपूर्वकं पीडायां शतं पणा दम इत्यर्थः । शोणितं यथा न दृश्यते तथा काष्ठादिभिः परं ताडयन्नरो द्वात्रिंशतं पणान् दाप्यः । असृजो रुधिरस्य दर्शने तु द्विगुणं दाप्यः । त्वगादिभेदे तु विशेषमाह मनुः—

त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः ।
मांसभेत्ता च षण्निष्कान् प्रवास्यस्त्वस्थिभेदकः ॥

इति । करादित्रयस्य प्रत्येकं भङ्गे कर्णस्य नासाया अवच्छेदने रूढव्रणस्योद्भेदने मृतकल्पो यथा भवति तथा हते ताडिते च मध्यमसाहसो दण्डः । तथापदेनांगुलिच्छेदसङ्ग्रहः । चेष्टेति । गमनभोजनवचनानामन्यतमस्य निरोधेन जिह्वादिप्रतिभेदेन कन्धरा ग्रीवा, बाहुः भुजः, सक्थि ऊरुः एतदन्यतमस्य भङ्गे च मध्यमसाहसो दण्डः । चकारेण पार्ष्णिप्रभृतिसङ्ग्रहः । एकं बहवो यत्र घ्नन्ति तत्रैकस्य हन्तृत्वे यो दण्डो यत्रोक्तस्तद्द्विगुणस्तास्मिन्नपरे दण्ड इत्यर्थः, न हीनोत्तमभेदे । न चात्र दण्डाधिक्यन्यूनते द्रष्टव्ये ॥

---

(१) वर्णानां घ. । (२) करदन्तपादभङ्गे—इति क० पु० पाठः ।

किञ्च—

कलहापहृतं देयं दण्डश्च द्विगुणस्ततः ॥ २२१ ॥

कलहे वर्तमाने यदेकेनापरस्याऽपहृतं तत्तेन देयं परस्मै ततस्तस्माद्विगुणश्च दण्डोऽपहारनिमित्तको राज्ञा देयः ॥ २२१ ॥

(मिता०) किञ्च—

पादेति । पादकेशवस्त्रकराणामन्यतमं गृहीत्वा य उल्लुञ्चति झटित्याकर्षयति असौ दशपणान्दण्ड्यः । पीडा च कर्षश्चांशुकावेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासं तस्मिन्समुचिते शतं दण्ड्यः । एतदुक्तं भवति । अंशुकेनावेष्ट्य गाढमापीड्याकृष्य च यः पादेन घट्टयति तं शतं पणान्दा(१)पयेदिति ॥ २१७ ॥

(मिता०) किञ्च—

शोणितेनेति । यः पुनः शोणितं यथा न दृश्यते तथा मृदु ताडनं काष्ठलोष्टादिभिः करोत्यसौ द्वात्रिंशतं पणान्दण्ड्यः । यदा पुनर्गाढताडनेन लोहितं दृश्यते तदा द्वात्रिंशतो द्विगुणं चतुःषष्टिपणान्दण्डनीयः । त्वङ्मांसा(२)स्थिभेदे पुनर्विशेषो मनुना दर्शितः (८।२८४) 'त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः । मांसभेत्ता च षण्निष्कान्प्रवास्यस्त्वस्थिभेदकः' ॥ इति ॥ २१८ ॥

(मिता०) किञ्च—

करपादेति । करपाददन्तस्य प्रत्येकं भङ्गे कर्णनासस्य च प्रत्येकं छेदने रूढव्रणस्योद्भेदने मृतकल्पो यथा भवति तथा हते ताडिते मध्यमसाहसो वेदितव्यः । अनुबन्धादिना विषयस्य साम्यमत्रापादनीयम् ॥ २१९ ॥

(मिता०) किञ्च—

चेष्टेति । गमनभोजनभाषणनिरोधे नेत्रस्य आदिग्रहणाज्जिह्वायाश्च प्रतिभेदने । कन्धरा ग्रीवा, बाहुः प्रसिद्धः, सक्थि ऊरुस्तेषां प्रत्येकं भञ्जने मध्यमसाहसो दण्डः ॥ २२० ॥

(मिता०) अपिच—

एकमिति । यदा पुनर्बहवो मिलिता एकस्याङ्गभङ्गादिकं कुर्वन्ति तदा यस्मिन्यस्मिन् अपराधे यो यो दण्ड उक्तस्तत्र तस्माद् द्वि-

(१) दमयेति ग. । (२) मांसास्थिविभेदे ख. ।

गुणो दण्डः प्रत्येकं वेदितव्यः । अतिक्रूरत्वात्तेषां प्रातिलोम्यानुलोम्यापरा(१)धयोरप्येतस्यैव सवर्णविषयेऽभिहितस्य दण्डजातस्य वाक्पारुष्योक्तक्रमेण हानिं वृद्धिं च कल्पयेत् । 'वाक्पारुष्ये य एवोक्तः प्रा(२)तिलोम्यानुलोमतः । स एव दण्डपारुष्ये दाप्यो राज्ञा यथाक्रमम्' ॥ इति स्मरणात् ॥

(मिता०) किञ्च—

कलहेति । कलहे वर्तमाने यद्येनापहृतं तत्तेन प्रत्यर्पणीयम् । अपहृतद्रव्याद्द्विगुणश्चापहारनिमित्तो दण्डो देयः ॥ २२१ ॥

दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययम् ॥
दाप्यो दण्डं च यो यस्मिन् कलहे समुदाहृतः ॥ २२२ ॥

यस्तु ताडने व्रणादिकमुत्पादयेत् स औषध्यादिना व्रणादिपीडितस्य सम्यगुत्थानार्थं जातं द्रव्यव्ययं दाप्यः । यावता तस्यौषधादिकं जायते तावद् द्रव्यं दाप्य इत्यर्थः । व्रणाद्युत्पादनस्थले न केवलं तद्दानमेवं, किंतु यस्मिन्कलहे यो दण्डः समान्यत उदाहृतस्तमपि दाप्यः । चकारेण च समुच्चयार्थकेन विकल्पं वारयति॥२२२॥

(मिता०) किञ्च—

दुःखमिति । यो यस्य ताडनाद् दुःखमुत्पादयेत्स तस्य व्रणरोपणादौ औषधार्थं पथ्यार्थं च यो व्ययः क्रियते तं दद्यात् । समुत्थानं व्रणरोपणम् । यस्मिन्कलहे यो दण्डस्तं च दद्यान्न पुनः समुत्थानजव्ययमात्रम् ॥ २२२ ॥

(वी० मि०) एवं द्रुष्यपुरुषशरीरे दण्डपारुष्ये दण्डमभिधाय तद्भिन्ने दण्डपारुष्ये तमाह—

अभिघाते तथा छेदे भेदे कुड्यावपातने ॥
पणान् दाप्यः पञ्च दश विंशतिं तद्व्ययं तथा ॥ २२३ ॥
दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरं तथा ॥
षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमम् ॥ २२४ ॥

---

(१) पराधेप्येतस्यैव घ. ।

(२) एवोक्तः प्रतिलोमानुलोमतः । स एव दण्डपारुष्ये राज्ञा कार्यो यथाक्रमम् 'घ. ।

दुःखे च शोणितोद्भेदे(१) शाखाङ्गच्छेदने तथा ॥
दण्डः क्षुद्रपशूनां (२)स्याद्द्विपणप्रभृतिः क्रमात् ॥ २२५ ॥
लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च ॥
महापशूनामेतेषु स्थानेषु द्विगुणो दमः ॥ २२६ ॥
प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे ॥
उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः ॥ २२७ ॥
चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ॥
जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते ॥ २२८ ॥
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् ॥
पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्तने ॥ २२९ ॥

कुड्यस्य भित्तेः अवपातने भूमिनिपातने अभिघाते मुद्गरादिना हनने छेदने खड्गादिना द्वैधीकरणे भेदे यष्ट्यादिना विदारणे। यथाशब्दस्त्रिष्वप्यन्वेति । मुद्गरादिनेत्युक्तास्तदर्थाः । पञ्च दश विंशतिश्च पणाः क्रमेणऽभिघातादौ विकल्पेनाऽन्वीयन्ते, अवपातने तु समुच्चयेन । तद्ययं कुड्यस्य पुनः करणार्थं व्ययितं धनम् । तथाशब्देन साहित्यं विवक्षितम् । दुःखोत्पादनशीलं कण्टकादि द्रव्यं, प्राणहरं सर्पादि परस्य गृहे येन प्रकारेण प्रक्षेपो दुःखोत्पादकस्तथा क्षिपन् दण्ड्यः । तत्राद्यः कण्टकादिक्षेप्ता षोडश पणान्, द्वितीयः सर्पादिक्षेप्ता मध्यमसाहसं दमं दाप्यः । क्षुद्रपशूनां हरिणच्छागादीनां ताडने दुःखोत्पादं शोणितं स्रावणे शाखायाः शृङ्गादिरूपायाः छेदेन अङ्गस्य चरणादेः छेदेन द्विपणः प्रभृतिरादिर्यस्य स दण्डगणः क्रमेण स्यादित्यर्थः । अत्र द्वित्वसंख्याया एव श्रवणाद् द्वयं द्वयं पणानां वर्द्धते । क्रमशः क्षुद्रपशूनां लिङ्गस्य छेदने मारणे वा मध्यमसाहसो दण्डः स्यात्, मूल्यं च स्वामिने स दद्यात् । महापशूनां तु दुःखोत्पादादिषु विषये क्षुद्रपशुपूक्तानां दण्डानां द्विगुणा दण्डाः कार्याः । चकारेणाऽत्रापि मूल्यदानम् । एवकारेण दुःखोत्पादादिषु चतुर्षु मूल्यदानव्यवच्छेदः । प्ररोहशाखिनां वटादिवृक्षाणामुपजीव्य-

(१) शोणितोत्पादे—इति मु० पु पाठ. । (२) तु—इति मु० पु० पाठः ।

द्रुमाणामाम्रादीनां च शाखाया मूलतन्निर्गमस्थानरूपस्कन्धस्य सर्वस्य समूलस्याऽवयविनश्च विदारणे विंशतिपणादारभ्य द्विगुणा दमा भवन्ति, विंशतिश्चत्वारिंशदशीतिः पणाः क्रमेण त्रिषु दण्डा इति यावत् । चकारेण प्ररोहिणामेव ग्रामादिस्थैरुपवेशनाद्यर्थमुपजीव्यत्वे तद्विदारणे पुनस्तद्द्वैगुण्यमिति समुच्चीयते । चैत्यं मनोरमस्थानं, सीमा ग्रामादिद्वयमर्यादा तासु पुण्यस्थाने यज्ञादिस्थले सुरालये देवस्थाने जातानां द्रुमाणां शाखादिविदारणे विश्रुते विख्याते पिप्पलादौ वृक्षे च शाखादिषु विदारितेषु पूर्वोक्ताद्विंशतिपणादेर्द्विगुणो दम इति । चकारेण समुत्थानव्ययदानं समुच्चीयते । गुल्मा अनतिदीर्घनिबिडलता मालत्यादयः, गुच्छा अवल्लीरूपा असरलाः कुरण्टादयः, क्षुपाः सरलप्रकाण्डाः करवीरादयः, लता दीर्घयायिन्योऽतिमुक्तादयः, ता एव स्थूलप्रतानाः काण्डप्ररोहरहिताः सारिवादयः, औषध्यः फलपाकान्ताः शाल्यादयः, छिन्ना अपि विविधं प्ररोहन्तीति वीरुधो गुडूचीप्रभृतयः । आसां शाखादिपूक्तेषु कर्तने छेदने पूर्वस्मृताद्विंशतिपणादेरर्धो दशपणादिर्दण्डः । समुत्थानव्ययदानं चात्राऽपि द्रष्टव्यम् । मनुः—

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात्पादच्छेदनमर्हति ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्याऽवकृष्टजः ।
कट्यां कृताङ्को निर्वास्यः स्फिचं वाऽस्यावकर्तयेत् ॥
अवष्ठीवयतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् ॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च ॥

ब्राह्मणविषये शूद्रस्यायं दण्डः । शस्त्रप्रयोगे विष्णुः—'शोणितेन विना दुःखमुत्पादयिता त्रिंशतं पणान् सह शोणितेन चतुःषष्टिम्' । विस्तरभयाच्च नेह दण्डयन्तराण्यभिधीयन्ते ॥ २२३—२२९ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने दण्डपारुष्यप्रकरणम् ॥

(मिता०) परगात्राभिद्रोहे दण्डमुक्त्वानन्तरं बहिरङ्गार्थनाशे दण्डमाह—

अभिघात इति । मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वि(१)धाकरणे च यथाक्रमं पञ्चपणो दशपणो विंशतिपणश्च दण्डो वेदितव्यः । अवपातने पुनः कुड्यस्यैते त्रयो दण्डाः स(२)मुच्चिता ग्राह्याः । पुनः कुड्यसंपादनार्थं च धनं स्वामिने दद्यात् ॥ २२३ ॥

(मिता०) अपिच—

दुःखोत्पादीति । परगृहे दुःखजनकं कण्टकादि द्रव्यं प्रक्षिपन् षोडश पणान् दण्ड्यः । प्राणहरं पुनर्विषभुजङ्गादिकं प्रक्षिपन्मध्यमसाहसं दण्ड्यः ॥ २२४ ॥

(मिता०) पश्वभिद्रोहे दण्डमाह—

दुःख इति । क्षुद्राणां पशूनां अ(३)जाविकहरिणप्रायाणां ताडनेन दुःखोत्पादने असृक्स्रवणे शाखाङ्गच्छेदने । शाखाशब्देन चात्र प्राणसंचाररहितं शृङ्गादिकं लक्ष्यते । अङ्गानि करचरणप्रभृतीनि । शाखा चाङ्गं च शाखाङ्गं तस्य छेदने द्विपणप्रभृतिर्दण्डः । द्वौ पणौ यस्य दण्डस्य स द्विपणः । द्विपणः प्रभृतिरादिर्यस्य दण्डगणस्यासौ द्विपणप्रभृतिः । स च दण्डगणो द्विपणश्चतुःपणः षट्पणोऽष्टपण इत्येवंरूपो न पुनर्द्विपणस्त्रि(४)पणश्चतुष्पणः पञ्चपण इति । कथमिति चेदुच्यते अपराधगुरुत्वात्तावत्प्रथमदण्डाद्गुरुतरमुपरितनं दण्डत्रितयमवगम्यते । तत्र चाश्रुतत्रित्वादिसंख्याश्रयणाद्वरं श्रुतद्विसंख्याया एवाभ्यासाश्रयणेन गुरुत्वसंपादनमिति निरवद्यम् ॥ २२५ ॥

(मिता०) किञ्च—

लिङ्गस्येति । तेषां क्षुद्रपशूनां लिङ्गच्छेदने मरणे च मध्यमसाहसो दण्डः । स्वामिने च मूल्यं दद्यात् । महापशूनां पुनर्गोगजवाजिप्रभृतीनामेतेषु स्थानेषु ताडनलोहितस्रा(५)वणादिषु निमित्तेषु पूर्वोक्ताद्दण्डाद्द्विगुणो दण्डो वेदितव्यः ॥ २२६ ॥

(मिता०) स्थावराभिद्रोहे दण्डमाह—

प्ररोहीति । प्ररोहा अङ्कुरास्तद्वन्त्यः शाखाः प्ररोहिण्यः याश्छिन्नाः पुनरुप्ताः प्रतिकाण्डं प्ररोहन्ति ताः शाखा येषां वटादीनां ते प्र-

---

(१) द्वैधीकरणे घ. । (२) समन्विताः घ. । (३) अजाविहारिणानां घ. ।
(४) स्त्रिश्चतुःप ख. । (५) स्रावणादिनिमित्तेषु ख. ।

काशीसंस्कृतसीरीज़्-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।		मूल्यम् ।
१ नलपाकः नलविरचितः । संपूर्णः	(पाकशास्त्रम् १)	रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् ।	(वेदान्तं १)	रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम्	(वैशेषिकं१)	रु०२—८
४ श्रीसूक्तम् ।— विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् ।	(वैदिकं १)	रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावः ।		रु० ५—०
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग	(व्याकरणं १)	रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता ।	(न्यायं १)	रु० ६—०
७ पञ्चकिरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् ।	(वेदान्तं २)	रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः ।		रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः ।	(कामशास्त्रं१)	रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः ।	(ज्यो० १)	रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् ।	(कर्मकाण्डम् १)	रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् ।	(वैदिकं २)	रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् ।	(वेदान्तं ३)	रु० १—४

१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं २) रु० ०—८
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाविम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०
२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायविन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८
२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०
२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४
२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ३—०
२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२

३० न्यायकुसुमाञ्जलीः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्याय वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः (न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या–तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षिभारद्वाजोद्द्योतकरविरचितम्। महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम्। (न्यायं वि० ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४)(वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ५) रु० २—०

४० श्रीनारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः–मेदिनीकारविरचितः। (कोशं १) रु० १—८

४२ मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम्। श्रीगोतममुनीप्रणीतम्। श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम्। श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम्। टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं१) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं२) रु० १—८

४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता । (ज्योतिषं ३) रु० २—

४७ फक्किकाप्रकाशः । उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ७) रु० १—४

४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या–श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०६) रु० १—४

४९ काव्यप्रकाशः । श्रीमम्मटाचार्यविरचितः । पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः (काव्य०४) रु०४—०

५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता । (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् महामहोपाध्याय श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण विरचितया भावबोधिनी टिप्पण्या समलङ्कृतम् संपूर्णम् । रु० १—४

५२ कार्थबोधः । साजनीकृत टीकोपेतः । दत्तात्रेय सम्प्रदायाऽनुगतः। रु०—८

५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डेय निर्मिता (काव्य० ६) रु०१—८

५४ अलङ्कारमुक्तावली । पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेयनिर्मिता— (काव्य० वि० ७) रु०-१२-

५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः । नारायणभट्टीयव्याख्यासहितः। सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः । श्रुतबोधच्छन्दोमञ्जरीसुवृत्ततिलकैश्च समेतः । (छंद वि० १) १-८-०

५६ अलङ्कारशेखरः । केशवमिश्रकृतः । साहित्योपाध्याय वेतालोपाह्व श्री अनन्तरामशास्त्रिणा भूमिकादिभिः संभूष्य संशोधितः । (अल० वि० १) १—४

५७ शक्तिवादः–टीकात्रयोपेतः । श्रीगदाधरभट्टाचार्यप्रणीतः । कृष्णभट्टकृतया मञ्जूषया–माधवभट्टाचार्यनिर्मितया विवृत्या श्रीमन्माध्वसंप्रदायाचार्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितया विनोदिन्या च समेतः । (न्या० वि० ७) २-०-०

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फाटक,
बनारस सिटी ।